Approved by the authorities for use in schools in Bengal (both Eastern and Western) Bombay, and Santiniketan.

# संस्कृतसन्दर्भः

COMPILED

OR

# A SANSKRIT READER

*SPECIALLY WRITTEN FOR YOUNG BOYS*

BY

PANDIT VIDHUSHEKHARA SHASTRI

OF SANTINIKETAN, BOLPUR.

**Fourth Edition**

CALCUTTA

DAS GUPTA & Co.

PUBLISHERS, BOOKSELLERS & PRINTERS

*54/3, College Street.*

1922

PUBLISHED BY
KSHITISH CHANDRA DAS GUPTA
54/3, COLLEGE STREET,
CALCUTTA

“योऽन्तः प्रविश्य मम वाचमिमां प्रसुप्तां
सञ्जीवयत्यखिलशक्तिधरः स्वधाम्ना ।
अन्यांश्च हस्तचरणश्रवणत्वगादीन्
प्राणान्, नमो भगवते पुरुषाय तुभ्यम् ॥”

श्रीमद्भागवतम् ।

PRINTED BY
HARI CHARAN RAKSHIT
AT THE BHARAT MIHIR PRESS
25, ROY BAGAN STREET,
CALCUTTA

# PREFACE.

The following pages were originally meant for the students in Śantiniknikétana, Bolpur. The boys gave them a glad reception and expressed their fond anxiety to see them in print Partly to please my pupils and partly to do a service to the country at large, I now take leave to present them to the public in the hope that they will not be denied the generous encouragement they deserve.

I have attempted, in the course of the book, to offer, as far as possible, a picture of the ब्रह्मचर्य as practised in ancient India, which was rightly believed to be essential to happiness here and hereafter, and I have spared no pains to describe, so far as space has permitted, the true character of an आचार्य dwelling in a peaceful आश्रम with his family and his students. Liberty has also been taken to quote simple sentences, embodying the high ideals of a ब्रह्मचारी or a गृहस्थ and also of human life in the main, from various ancient works which will, I believe, diffuse the sacred aroma of antiquity over whatever I have written in defence of the eternal principles of purity and right-mindedness.

The lessons of the book have been given in the form of dialogues, and the author has made every effort to write as idiomatically and with as much ease and grace as he can command. Should the educated public pronounce his undertaking successful, he will think himself more than amply rewarded.

I need hardly say, that the present volume is a *Reader* and not a Grammatical treatise. But I am

happy to say, the lessons have been so framed and arranged that even a beginner in grammar may derive much help from them. The subjects treated of in the book will, I am confident, meet the requirements of the fourth and the third classes of an H. E. School.

A few poems of pleasent meteres, intended for *recitation*, have been given towards the end of the work. Experience tells me that they will afford high and sincere satisfaction to the boys. With a few exceptions, as noted in the proper place, all the poems are from my own pen, and almost all of them originally appeared in the मित्रगोष्ठीपत्रिका, a Sanskrit monthly edited by myself and my learned friend Professor Rāmāvatāra Pāndeya, Sāhityāchārya, M. A. sometime ago. I have much pleasure to inform the public that the poem entitled भारतगीतिका owes its authorship to Prof. Pāndeya. The verses with the headings of चातक and भ्रमर are anonymous but old. They are the best specimens of their class, and are inserted in the book that the teachers may present their pupils with a few more of the kind from their wide and extensive reading.

I can not conclude this preface without offering my hearty thanks to my learned friend Pandita Haricharana Vandyopādhyāya, Kāvyavinoda of our Sāntiniketan Aśrama, for the kind help he has rendered me by looking through the proofs, and also by giving many valuable suggestions.

CALCUTTA, <br>
*July 25, 1912,* } VIDHUSHEKHARA BHATTACHARYA.

## CONTENTS


**प्रथमः प्रपाठकः**

अक्रियापदानि वाक्यानि, प्रथमा (क)

Sentences without Verbs, First Case-ending, (A) १

**द्वितीयः प्रपाठकः**

अक्रियापदानि वाक्यानि, प्रथमा (ख)

Sentences without Verbs, First Case-ending, (B) ३

**तृतीयः प्रपाठकः**

धातवः—भ्वादयः चुरादयश्च, लट्, द्वितीया

Roots of the First and Tenth Conjugations

Present Tense, Second Case-ending ... ५

**चतुर्थः प्रपाठकः**

धातवः—दिवादयः, तुदादयश्च, लोट्, तृतीया १२

Roots of the Fonrth and Sixth Conjugations,

The Imperative Mood, Third Case-ending ... १५

**पञ्चमः प्रपाठकः**

धातवः—स्वादयः तनादयश्च, विधिलिङ्, चतुर्थी

Roots of the Fifth and Eighth Conjugations,

The Potential Mood, Fourth Case-ending ... २०

**षष्ठः प्रपाठकः**

धातवः—क्र्यादयः, लङ्, पञ्चमी

Roots of the Ninth Conjugation, Past Tense

( *Imperfect* ), Fifth Case-ending ... २५

**सप्तमः प्रपाठकः**

धातवः—अदादयः, लृट्, षष्ठी सप्तमी च

Roots of the Second Conjugation, Future Tense, Sixth and Seventh Case-endings ... २९

**अष्टमः प्रपाठकः**

धातवः—ह्वादयः रुधादयश्च, क्त्वा, ल्यप्

Roots of the Third and Seventh Conjugations, Indeclinable Past Participles or Gerunds ... ३६

**नवमः प्रपाठकः**

तुमुन्, शतृ, शानच्

The Infinitive Mood and Present Participles ... ४१

**दशमः प्रपाठकः**

णिच्

The Causal ... ... ... ... ४४

**एकादशः प्रपाठकः**

भावकर्मप्रक्रिया

Impersonals and Passives ... ... ४६

**द्वादशः प्रपाठकः**

निष्ठाप्रत्ययः

Past Participles ... ... ... ४९

**त्रयोदशः प्रपाठकः**

कृत्यप्रत्ययः

Potential Passive Participles ... ... ५३

चतुर्दशः प्रपाठकः

विविधम् (क)
Miscellany (A) ... ... ... ५५

पञ्चदशः प्रपाठकः

विविधम् (ख)
Miscellany (B) ... ... ... ५६

षोडशः प्रपाठकः

विविधम् (ग)
Miscellany (C) ... ... — ६६

## परिशिष्टम्

श्लोकाः

प्रभातम् ... ... ... ... ७१
उद्बोधनम् ... ... ... ... ७२
भारती ... ... ... ... ७३
प्रदोषः ... ... ... ... ७२
निदाघः ... ... ... ... ७४
प्रावृट् ... ... ... ... ७५
भारतगीतिका ... ... ... ७६
चातकः ... ... ... ... ७७
भ्रमरः ... ... ... ... ७८

# ABBREVIATIONS

| | | | | | |
|---|---|---|---|---|---|
| *adj.* | ... | Adjective | *m.* | ... | Masculine |
| *f.* | ... | Feminine | *n.* | ... | Neuter |
| *ind.* | ... | Indeclinable | *pro.* | ... | Pronoun |

| | | | | | |
|---|---|---|---|---|---|
| *a.* | ... | आत्मनेपद | *kri.* | ... | क्र्यादि |
| *ad.* | ... | अदादि | *p.* | ... | परस्मैपद |
| *bhu.* | ... | भ्वादि | *su.* | ... | स्वादि |
| *chu.* | ... | चुरादि | *tan.* | ... | तनादि |
| *div.* | ... | दिवादि | *tud.* | ... | तुदादि |
| *hu.* | ... | ह्वादि | *u.* | ... | उभयपद |

# संस्कृतसन्दर्भः

## प्रथमः प्रपाठकः

—:o:—

### अक्रियापदानि वाक्यानि

**प्रथमा**

(क)

### SENTENCES WITHOUT VERBS

FIRST CASE-ENDING.

(A)

**शब्दाः**

अशक्य *adj.* impracticable.

अस्य *pro.* its.

इव *ind.* like, as.

तत् *adv.* therefore.

तथा हि *ind.* for, for instance.

दारुण *adj.* painful.

दावानल *m.* a forest-conflagration.

निदाघ *m.* the summer season.

प्रखर *adj.* very sharp, very hot.

प्रचण्ड *adj.* fierce.

मृगयूथ *n.* मृग *m.* a wild beast, यूथ *n. m.* a herd; a herd of wild beasts.

म्रियमाण *adj.* one about to expire.

म्लान *adj.* faded.

वत्स *adj,* or *m.* dear, child.

शोभन *adj.* good.

सर्वथा *ind.* entirely, in all respects.

सुदुःसह *adj.* very unbearable.

स्तब्ध *adj.* motionless.

स्फुलिङ्ग *m.* a spark of fire.

वत्स चन्द्रसेन, प्रचण्डोऽयं निदाघः। तथाहि, सुदुःसहो दिवसः। मध्यगगनस्थितो भगवान् दिनकरः। अग्निस्फुलिङ्गा इव प्रखरा अस्य किरणाः। दग्धीभूतेव पृथिवी। अग्निमया इव पन्थानः। अङ्गारा इव धूलयः। दुष्करोऽत्र पदक्षेपः। निश्चलो मारुतः। स्तब्धा दिशः। स्थिराः पादपाः। नीरवा विहङ्गमाः। चञ्चलाः पशवः। गृहोन्मुखाः कृषीवलाः। शुष्कश्च पङ्कमयश्च जलाशयः। मृतश्च म्रियमाणश्च मीनसमूहः। म्लानमुद्यानम्। मलिनानि कुसुमानि। विलीनानि मधूनि। प्रस्थिताश्च मधुकराः।

तृषितश्चातकः। शुष्कोऽस्य कण्ठः। नीरसा जिह्वा। अन्धीभूतमिव नयनम्। दुर्बलौ पक्षौ। शिथिलमङ्गम्। चञ्चलाः प्राणाः। दुर्लभं जलम्। अदृश्यो मेघः। मृत्युरिव उपस्थितोऽस्य।

उद्दीप्तो दावानलः। दग्धा वनभूमिः। भीतानि च धावितानि च मृगयूथानि।

तद् वत्स चन्द्रसेन, सर्वथा दारुणोऽयं निदाघदिवसः। अशक्यमिदानीं बहिर्गमनं। तद् गृहमध्यावस्थानमेव शोभनम्।

# द्वितीयः प्रपाठकः

—o—

## अक्रियापदानि वाक्यानि

### प्रथमा

### (ख)

---

## SENTENCES WITHOUT VERBS

### FIRST CASE-ENDING.

### ( B )

---

### शब्दाः

अनिशम् *ind.* always, continually.

अनुचित *adj.* improper.

अपरतः *ind.* on the other side.

अवनति *f.* downfall.

अस्तोन्मुख *adj.* अस्त *m.* the western mountain behind which the sun is supposed to set, उन्मुख *adj.* one about to do something; ready to retire to the western mountain.

अहो *ind.* implying surprise.

उदयोन्मुख *adj.* उदय *m.* the eastern mountain or rising; ready to rise.

उद्बुद्ध *adj.* awakened.

उद्भासित *adj.* brightened.

एकतः *ind.* on one side.

एव *ind.* used to emphasize an idea.

कुमुद *n.* a white waterlily.

कुवलय *n.* a lotus.

कूजनमुखर *adj.* कूजन *n.* warbling, मुखर *adj.* making a continuous sound; continuously warbling.

तु *ind.* but.

दिगङ्गन *n.* दिश *f.* a quarter. of the sky, अङ्गन *n.* a court-yard ; a quarter of the sky like a court-yard.

ननु *ind.* a particle of interrogation.

निरत *adj.* engaged.

नैसर्गिक *adj.* natural.

परिहरणीय *adj.* that which should be abandoned.

प्रभातप्राया *adj.* about to dawn.

बालातप *m.* बाल *adj.* not full-grown, आतप *m.* sunshine ; morning sunshine.

विभावरी *f.* night.

शिशिर *n.* dew.

श्यामल *adj.* green.

समुन्नति *f.* rise, prosperity.

सम्पन्न *adj.* prosperous.

सुरभि *adj.* fragrant.

स्थिति *f.* settledrule.

हन्त *ind.* implying joy or sorrow, oh ! alas !

---

हन्त प्रभातप्राया विभावरी । अस्तोन्मुखो निशाकरः, दिनकरस्तु उदयोन्मुखः । मलिनं पश्चिमं दिगङ्गनं, उज्ज्वलं तु पूर्वम् । म्लानानीव कुमुदानि, उत्फुल्लानीव तु कुवलयानि । एकतो विषादः, अपरतस्तु प्रसादः । एकतो दुःखं, अपरतस्तु सुखम् । एकस्यावनतिः, अपरस्य तु समुन्नतिः । एको विपन्नः, अपरस्तु सम्पन्नः । सोऽयं नैसर्गिकी स्थितिः । न हि गगनमनिशं मेघाच्छन्नं, सूर्यसमुज्ज्वलं वा ।

अहो रमणीयोऽयं समयः । उन्मुखाः कूजनमुखरा विहङ्गमाः । विकसितानि सुरभीणि कुसुमानि । शिशिर-सुन्दराणि श्यामलानि दूर्वाक्षेत्राणि । धीरसञ्चारी सुरभि-

शीतलः समीरणः। लोहितो मधुरो बालातपः। उद्भासितानि दिगन्तराणि। नवीनमिव च सर्वं भुवनम्। वत्स अश्वव्रत, अनुचितमिदानीं शयनम्। परिहरणीयमिदम्। ननु क्षुद्रा मधुकरा अपीदानीं स्वकर्मनिरताः। वयं तु मानवाः। तत् सर्वथैव अनुचितमिदं, सर्वथैव अनुचितम्।

---

## तृतीयः प्रपाठकः

—:o:—

### धातवः—भ्वादयः, चुरादयश्च

### लट्, द्वितीया

---

## ROOTS OF THE FIRST AND TENTH CONJUGATIONS

PRESENT TENSE

SECOND CASE-ENDING

---

### धातवः

### ( क )

### भ्वादयः

अट् *p.* to wander, with परि about, to wander about.

कूज् *p.* to warble.

क्रीड् *p.* to play.

खाद् *p.* to eat.

खेल् *p.* to play.

गम् (गच्छ्) *p.* to go; with अव to know; with उत् to go up.

गुञ्ज् *p.* to hum.

गै *p.* to sing; to sing a song.

घ्रा ( जिघ्र् ) *p.* to smell.

चर् *p.* to walk ; to practise ; with परि to serve.

चल् *p.* to walk ; to go.

त्यज् *p.* to give up.

दृश् ( पश्य् ) *p.* to see.

धाव् *n.* to run ; with अनु to run after, to follow.

ध्यै *p.* to meditate on.

नन्द् *p.* to be glad.

पच् *n.* to cook.

पठ् *p.* to read.

पत् *p.* to fall.

भू *p.* to be, to become ; with अनु to feel, to enjoy ; with सम् to be possible.

भ्रम् *p.* to walk.

यम् ( यच्छ् ) *p.* to check, to restrain ; with सम् intensifies the meaning.

लस् *p.* to shine ; with उत् conveys the same idea.

हस् *p.* to smile, to laugh.

हृ *u.* to carry ; with परि to abandon ; with सम् to destroy.

ह्वे *u.* to call out ; with आ to invite.

वद् *p.* to say, to tell.

वृत् *a.* to be, to exist.

श्रि *u.* to go to, to take shelter, to have recourse to ; with आ gives the same meaning.

सेव् *a.* to serve ; to enjoy.

स्था(तिष्ठ्) *p.* to stand ; to stay.

( ख )

## चुरादयः

कथि *p.* to tell.

चर्चि *p.* to read ; to discuss.

धारि *p.* to hold.

पालि *p.* to protect.

पूजि *p.* to adore.

पूरि *p.* to fill.

भक्षि *p.* to eat.

रचि *p.* to make; to compose.

लोकि *p.* to look at ; with आ gives the same meaning.

शीलि *p.* to practise repeatedly; to contemplate; with अनु gives the same meaning.

## शब्दा:

अग्रत: *ind.* before.
अतिथि *m.* a guest.
अत्र *ind.* here.
अनृत *n.* or *adj.* falsehood, false words; untrue.
अपर *pro.* another.
अपि *ind.* also, too; introduces a question.
आश्रमपद *n.* आश्रम *m.* a hermitage, पद *n.* a place; a hermitage with its surrounding grounds.
आचार्य *m.* a holy teacher who invests a boy with the sacred thread and instructs him in the वेद, etc.
इत: *ind.* here.
उताहो *ind.* or.
कथञ्चित् *ind.* somehow.
कवल *m. n.* a mouthful.
केचित् *pro.* some.
गृहमेधिन् *m.* a householder.
गृहस्थ *m.* a householder.
तत: *ind.* then, thence.
तरुवीथि *f.* a row of trees.
तर्क *m.* the science of Logic.
तावत् *ind.* first, now; with correlative यावत् so long as.
ते *pro.* तव।
दर्शन *n.* appearance.
दुरूह *adj.* abstruse.
दुर्जन *adj.* a wicked person.
धर्मभाव *m.* religious feeling.
ध्रुव *adj.* certain.
निरपराध *adj.* innocent.
निरुद्वेग *adj.* free from anxiety or fear; undisturbed.
नूनम् *ind.* certainly.
न: *pro.* अस्माकम्.
पुरुषार्थ *m.* the object of human life.
प्रतिवचन *n.* a reply.
प्रभूत *adj.* much, many.

प्रसून *n.* flower.
प्रस्फुटित *adj.* opened.
ब्रह्मचारिन् *m.* a student who practises the prescribed duties and observances in studying the Vedas, etc. at the house of his आचार्य till he settles in life.
भद्र *n.* or *adj.* good.
भवादृश *adj.* onelike yourself.
मधुलोलुप*adj.*greedy of honey.
मे *pro.* मम.
यावत् *ind. see* तावत् ।
वटु *m.* a boy.
वानप्रस्थ *m.* one in the third stage of his religious life.
वेदान्त *m.* one of the six principal systems of Hindu Philosophy.
सत्कार *n.* a hospitable reception; reverence.
सदाचार *m.* good observance.
सामन् *n.* a verse of the Sāmaveda.
सुकृत *n.* virtue or religious merit.
स्वेच्छाचार *m.* waywardness.
हन्त भोः *ind.* used to imply joy, surprise.
होमगन्ध *m.* होम *m.* offering oblation to the gods into fire, गन्ध *m.* odour; odour of oblations offered to the gods into fire.

---

धर्मरक्षितः। सखे ब्रह्मदत्त, पश्यसि इदं तद् आश्रमपदम्?

ब्रह्मदत्तः। कथं न पश्यामि। पश्यामि च नन्दामि च। धर्मरक्षित, के पुनरेते क्रीडन्ति?

धर्मरक्षितः। आश्रमवटव एते।

ब्रह्मदत्तः। आश्रमवटव एते। अहो प्रियमेषां दर्शनम्। अयत्नरमणीयो वेशः, विनयमधुरश्च स्वभावः। सर्वथा

सफलमिवेदानीं मे नयनम्। हन्त कथमेते खेलन्ति। एको धावति, अपरोऽनुधावति। एकः पतति, अन्ये हसन्ति। कश्चिच्चलति, अपरस्तिष्ठति। एके भ्रमन्ति, अपरे गायन्ति। तद् मनोज्ञम्, अतिमनोज्ञं दर्शनमिदम्। धर्मरक्षित, अग्रतस्तावद् गच्छावः।

धर्मरक्षितः। जिघ्रसि ब्रह्मदत्त, कथमेष सुरभिर्होमगन्धः सर्वत उद्गच्छति? एते हरिणशिशवो निरुद्वेगाः पश्यन्ति च, धावन्ति च, क्रीडन्ति च। एते मयूराश्चरन्ति। इमाश्चात्र होमधेनवः पर्यटन्ति। एते शुकशावकाः, अन्ये चानेके विहङ्गमाः कूजन्ति।

ब्रह्मदत्तः। सखे, इतोऽपीयं रमणीया उल्लसति तरुवीथिः। एतानि प्रस्फुटितानि प्रसूनानि। गुञ्जन्ति चैते मधुलोलुपा मधुकराः।

धर्मरक्षितः। ब्रह्मदत्त, अत्राप्यवलोकयावः। एते परिभ्रमन्ति ब्रह्मचारिणः। आहरन्ति चैते कुशं, पुष्पं, समिधश्च। एते हि परिचरन्ति आचार्यान्, न तु दुर्जनान्; आचरन्ति सदाचारान्, न तु स्वेच्छाचारान्; परिहरन्त्यविनयं, न तु विनयम्; त्यजन्ति हिंसां, न तु दयाम्; वदन्ति सत्यं, न त्वनृतम्; संयच्छन्ति च इन्द्रियाणि, न तु निरपराधान्। एते केचिद् ब्रह्मचारिणो वेदान् पठन्ति, केचित् सामानि गायन्ति, केचित् तर्कमालोचयन्ति,

केचित् वेदान्तमनुशीलयन्ति, केचिच्चापरां विद्यां चर्चयन्ति।

ब्रह्मदत्तः। एते चात्र गृहस्था मुनयः आगतान् अतिथीन् पूजयन्ति। अये किमेष महाभाग आवामाह्वयति? किं कथयसि भगवन्, "युवाम् अतिथी, तद् ग्रहणीयोऽयं सत्कार इति?" साधु, भगवन् साधु! नूनं प्रभूतं नः सुकृतं, यद् भवादृशा अप्यस्मान् आह्वयन्ति। तदिमौ गच्छावः।

धर्मरक्षितः। अपि त्वम् अवगच्छसि ब्रह्मदत्त, यदेते गृहमेधिनो न तावद् भक्षयन्ति, यावन् न भक्षयन्ति अतिथय इति?

ब्रह्मदत्तः। अपि सत्यमिदम्?

धर्मरक्षितः। किमसत्यं कथयामि?

ब्रह्मदत्तः। अहो महानेषां धर्मानुरागः!

धर्मरक्षितः। यो जनः केवलम् आत्मार्थम् अन्नं पचति, निजोदरमेव पूरयति, नायम् अन्नकवलं खादति, अपि तु पापकवलमेव, इति हि धर्मशास्त्राणि वदन्ति।

ब्रह्मदत्तः चारुतरं पवित्रतरं चेदम्। अथ धर्मरक्षित, इमे पुनः के?

धर्मरक्षितः। एते वानप्रस्थाः। ईश्वरलाभ इति वा, मुक्तिरिति वा परमः पुरुषार्थः। तदर्थमेते साम्प्रतं त्यक्तगृह-

वासाः पुण्यमरण्यमाश्रयन्ति, तपांसि चरन्ति, कथञ्चित् शरीरं धारयन्ति, सेवन्ते च भगवन्तम्। इतश्चामी सन्न्यासिनो मुनयः, एते हि छिन्ननिखिलसम्बन्धा भगवन्तं ध्यायन्ति।

ब्रह्मदत्तः। भद्रं ते, सखे धर्मरक्षित, ईश्वर इति, भगवान् इति च यत् त्वं कथयसि, तत्रायं मे प्रश्नः— कोऽयमीश्वरः? को वायं भगवान्? कस्तं पश्यति, अनुभवति वा?

धर्मरक्षितः। ब्रह्मदत्त, अतिगम्भीरोऽयं ते प्रश्नः। दुरूहमस्य प्रतिवचनम्। तथापि किञ्चित् कथयामि। किं त्वं वदसि ब्रह्मदत्त, किमिदं ते वसनं स्वयमुत्पन्नं, उताहो वर्तते कश्चिदस्य कर्ता।

ब्रह्मदत्तः। कथं स्वयमुत्पन्नं, ननु तन्तुवायोऽस्य कर्ता।

धर्मरक्षितः। अथ यदिदं ते कनकाङ्गुरीयकं, किमिदं स्वयमुत्पन्नं, उताहो अस्यापि कश्चित् कर्ता वर्तते?

ब्रह्मदत्तः। वर्तते अस्यापि कर्तेति प्रसिद्धमेव। ततः किम्?

धर्मरक्षितः। तत इदं भवति, यत् सर्वस्यापि कार्यस्य कश्चित् कर्ता भवतीति। नैतदेवम्?

ब्रह्मदत्तः। एवमेव, कः सन्देहः।

धर्मरक्षितः। अथ यदिदं जगद्रूपं कार्यम्, नूनम्

अस्यापि कश्चित् कर्ता वर्तते। किं त्वं वदसि ब्रह्मदत्त ?

ब्रह्मदत्तः। किमन्यद् वदामि। ध्रुवं वर्तत एव।

धर्मरक्षितः। किमयं कर्ता त्वं वा, अहं वा, अयं वा, असौ वा, अन्यो वा कश्चित् ?

ब्रह्मदत्तः। हन्त भोः, नैतादृशः कश्चित् तस्य कर्ता सम्भवति। न पुनरवगच्छामि कः स इति।

धर्मरक्षितः। ब्रह्मदत्त, अयमेव ईश्वर इति वा, भगवान् इति वा प्रसिद्धः। एष एव विश्वं रचयति, पालयति, संहरति च। भक्ता एव चैनं पश्यन्ति।

ब्रह्मदत्तः। साधु, सखे धर्मरक्षित, साधु! हृदयङ्गमं ते वचनं। चिरं स्मरणीयमिदम्।

धर्मरक्षितः। अथ साम्प्रतं गृहमेव गच्छसि ?

ब्रह्मदत्तः। अथ किम्। त्वं पुनः ?

धर्मरक्षितः। अहमपि गच्छामि।

---

# चतुर्थः प्रपाठकः

धातवः—दिवादयः, तुदादयश्च

लोट्, तृतीया

## ROOTS OF THE FOURTH AND SIXTH CONJUGATIONS

THE IMPERATIVE MOOD

THIRD CASE-ENDING

### धातवः

(क)

दिवादयः

कुप् *p*. to be angry.

क्रुध् *p*. to be angry.

तुष् *p*. to be pleased; with सम् to be pleased completely.

तृप् *p*. to be gratified.

दृप् *p*. to be proud.

नृत् *p*. to dance.

मद् *p*. to be glad; to be mad, with उत् to be mad.

मुह् *p*. to faint, to bee bereft of sense or wisdom.

राध् *p*. to be accomplished; with अप to offend.

शम् *p* to be calm, to be quiet.

सिध् *p*. to be accomplished.

स्निह् *p*. to feel affection for.

## ( ख )

### तुदादयः

इष् *p.* to wish.

कृत् *p.* to cut.

क्षिप् *u.* to throw.

दिश् *p.* with आ to direct; with उप to instruct; with निर् to point out.

प्रच्छ् ( पृच्छ् ) *p.* to ask.

मिल् *p.* to come together, to assemble; with सम् gives the same meaning.

लिख् *p.* to write.

लिप् ( लिम्प् ) *u.* to anoint.

विद् ( विन्द् ) *u.* to gain.

सिच् ( सिञ्च् ) *u.* to sprinkle.

सृज् *p.* to create, to make; with वि to abandon; to send.

स्पृश् *p.* to touch.

## ( ग )

### अन्ये

ईरि *chu. p.* to cause to go; with प्र to send forth.

गम् ( गच्छ् ) *bhu. p.* to go; with सम् *a.* to join together

चर् *bhu. p.* with आ to practise.

चिन्ति *chu. p.* to think.

ध्मा ( धम् ) *bhu. p.* to blow ( as a wind-instrument), to produce sound by blowing.

भ्रम् *bhu. p.* (optionally conjugated like दिवादि class), to walk.

मार्जि *chu. p.* to wash off.

लप् *bhu. p.* to speak; with आ to address, to converse.

सद् ( सीद् ) *bhu. p.* with प्र to be pleased, propitious; with प्रति+आ to draw near.

स्था ( तिष्ठ् ) *bhu. p.* with अनु to perform.

हृ *bhu. u.* with आ to bring.

## शब्दाः

**अतिथिविशेष** *m.* a respectable guest.

**अभिनव** *adj.* new.

**अलम्** *ind.* away with, enough of.

**आदर्श** *m.* a mirror ; *fig.* the original manuscript from which a copy is taken.

**आदिष्ट** *adj.* directed.

**उत्सव** *m.* a festival.

**कथं** *ind.* how, in what way.

**कदलीकाण्ड** *m. n.* कदली *f.* a plantain tree ; काण्ड *m. n.* a stem, a stock ; the stem of a plantain tree.

**कार्यजात** *n.* कार्य *n.* work, जात *n.* a number ; a number of works.

**किल** *ind.* implying certainty, probability, trabidition.

**क्रोधातिशय** *m.* क्रोध *m.* anger, अतिशय *m.* excess ; an excess of anger.

**खलु** *ind.* implying certainty, entreaty, inquiry.

**चूतमुकुल** *m. n.* चूत *m.* a mango tree, मुकुल *m. n.* a bud ; the bud of a mango tree.

**जीर्ण** *adj.* old, worn out.

**तपस्विन्** *m.* an ascetic ; *adj.* poor, pitiable.

**तर्हि** *ind.* then.

**दल** *n.* a leaf, a small blade.

**दुर्विपाक** *adj.* producing bad result.

**दौर्मनस्य** *n.* evil disposition, mental pain.

**निर्बन्ध** *m.* obstinacy.

**नु** *ind.* implying doubt, inquiry.

**बहिः** *ind.* outside.

**मधूक** *m.* a kind of tree.

**मर्मन्** *n.* the vitals.

**महोत्सवोचित** *adj.* suitable to a great festival.

विद्यार्थिन् *m.* one who wants learning, a student.

वेदि *f.* an elevated spot of ground.

व्यामोह *m.* infatuation.

शाश्वत *adj.* eternal.

शोभोपकरण *n.* the materials for elegance.

समयवेदिन् *m.* one who knows the proper time.

सरस *adj.* fresh.

सारस्वतोत्सव *m.* the festival of the goddess सरस्वती.

सौम्य *m.* gentle, good.

स्थाने *ind.* in the right place.

---

आचार्यः। विजयगुप्त ! विजयगुप्त !

विजयगुप्तः। अयमहम् आचार्य । किमादिशत्याचार्यः।

आचार्यः। वत्स विजयगुप्त, समागतः किलास्माकं सारस्वतोत्सवः। तत् कथय आयुष्मन्तम् इन्द्रविजयं, यथा सर्वे ब्रह्मचारिणः सम्मिलन्ति, तथा त्वं शङ्खं धम, अहं कार्यजातमुपदिशामीति। अहो समयवेद्यस्माकं वत्स इन्द्र-विजयः, यदेष स्वयमेवेदानीं शङ्खं धमति। आगच्छन्ति च मे विद्यार्थिनः। आगच्छत आयुष्मन्तः, आगच्छत; उप-विशत चात्र।

ब्रह्मचारिणः। आचार्य्य, एते वयं प्रणमामः।

आचार्यः। चिरं जीवन्तु मे वत्साः, विन्दन्तु च शाश्वतं कुशलम्। आयुष्मन्तः, समागतः सारस्वतोत्सवः, कार्य्याणि च बहूनि। तत्सर्वमनुतिष्ठत यूयमिति कथयामि।

ब्रह्मचारिणः। कर्मविभागं निर्दिशन्त्वाचार्यचरणाः।

आचार्यः। युक्तमिदम्। सौम्य चन्द्रप्रभ, त्वं तावत् सह सत्यव्रतेन निमन्त्रणपत्रं रचय। सत्यकामः, चन्द्रकेतुः, सोमदत्तश्च तेनादर्शेन कानिचित् पत्राणि लिखन्तु। इन्द्र-पालितो जयसेनश्च तानि प्रेरयताम्।

यशोभूतिः। आचार्य, अहं पुनः ?

आचार्यः। वत्स, तवापि कथयामि। य एते आश्रम-पादपाः, यथा शालाः, शिरीषाः, मधूकाः, चूताः, वकुलाः, देवदारवश्च, जीर्णैर्गलितैश्च पत्रैर्मलिनास्तेषां तलदेशः, अतस्त्वं सह मैत्रेयप्रभृतिभिस्तानि पत्राणि बहिर्निक्षिप। किं पृच्छसि चन्द्रचूड, किं मे कार्य्यमिति ? वत्स, इदं ते कार्यं निर्दिशामि। या एता अस्माकमुपवेशनवेदयः, यथा चन्द्रवेदिः, मरकतवेदिः, पद्मवेदिः, उत्पलवेदिप्रभृतयश्च, ता एव त्वं सह देवशर्मेन विश्वावसुना च मार्जय, लिम्प च। एष पुण्डरीकः, वसुभद्रः, धर्मपालितः, श्रीपतिदत्तश्च उत्सव-भूमिं, पन्थानं चैतं जलेन सिञ्चन्तु। अथ युष्माकं केचित् सरसानि देवदारुदलानि, केचिद् रमणीयानि खर्जूरपत्राणि, केचिद् अभिनवानि सपल्लवानि चूतमुकुलानि, केचित् सदलान् कदलीकाण्डान्, केचिच्च तानि तान्यपराणि शोभोप-करणानि आहरन्तु। अयन्तु ब्रह्मदत्तस्तथा सर्वमनुतिष्ठतु यथा महोत्सवोचितं अतिथिविशेषोचितं च सर्वं भोज्य

भवति। तद्गच्छत यूयमिदानीम् आयुष्मन्तः, अनुतिष्ठत च यद् आदिष्टम्। अहमपि अन्यत् सर्वं चिन्तयामि। अथ सौम्य शान्तिनाथ, वत्सः पुरञ्जनः कुत्र? अपि शाम्यत्येषः? अपि नायं पुनः कुप्यति?

शान्तिनाथः। प्रबलः खल्वस्य क्रोधः, तदिदानीमपि क्रुध्यत्येव, दृप्यति च। कथयति च दारुणानि वचनानि, तानि चास्माकं मर्माणि स्पृशन्ति, अथवा न केवलं स्पृशन्ति, अपि तु कृन्तन्त्येव।

आचार्यः। हन्त क्रोधातिशयोऽस्य, येनेदानीमुत्सव-समयेऽपि तपस्वी विषण्णः। वत्स, कथय तं, यदहं ते दर्शनमिच्छामीति।

शान्तिनाथः। यथादिशत्याचार्यः। एष गच्छामि। कोऽयमेकको भ्राम्यति? कथं पुरञ्जन एव। पुरञ्जन, पुरञ्जन, इतागच्छ, अत्रभवन्त आचार्यचरणास्ते दर्शन-मिच्छन्ति।

पुरञ्जनः। अलम्, अलम् मिथ्याकथनेन, नाहं गच्छामि।

शान्तिनाथः। भ्रातः पुरञ्जन, नाहमनृतं कथयामि, आगच्छ, पश्य च स्वयमेव।

पुरञ्जनः। अपि सत्यमेव? भवतु, गच्छामि। आचार्य, एषोऽहं प्रणमामि।

आचार्यः। वत्स, कुशलं ते भवतु। वत्स पुरञ्जन, इदं पुनः पृच्छामि, कोऽयं ते व्यामोहः? किं त्वमेवम् अस्थाने कुप्यसि? किं त्वमेवम् उन्माद्यसीव? न त्वं केनापि आलपसि, न केनापि क्रीडसि, न च किञ्चिद् अनुतिष्ठसि। पश्यैते सर्वे ब्रह्मचारिण आनन्देन नृत्यन्तीव। त्वमेवैक इत्थं विषण्णस्तिष्ठसि। न ते चित्तं सन्तुष्यति। वत्स, किमेवं मुह्यसि? कस्तवापराध्यति? अहन्तु न कस्याप्यपराधं पश्यामि। नहि सर्वेऽपि ब्रह्मचारिणस्तव शत्रवः। कथयामि वत्स, बन्धव एव ते तव। स्निह्यत्येव तेषां चित्तम्। आयुष्मन्, ब्रह्मचारी त्वम्। न हि ब्रह्मचारी एवं कुप्यति। तत् अलमेतेन कोपेन। मुञ्चेनं शीघ्रम्। दुर्विपाकः खल्वयम्। त्यजेदं दौर्मनस्यम्। पश्य चेदं सारस्वतोत्सवकार्यम्। कथय वत्स पुरञ्जन, कथय सत्यं, यदि न त्वं प्रसीदसि, न त्वं सन्तुष्यसि, न च त्वं किञ्चित् पश्यसि, तर्हि कथमयं सारस्वतोत्सवः सिध्यतु? कथं नु खलु त्वया विना उत्सवः सम्भवति। तद् विसृजेमं निर्बन्धं, संगच्छस्व च सर्वैः सुहृद्भिः। गच्छ त्वं सौम्य शान्तिनाथ, सह पुरञ्जनेन। कथय च सर्वान् विद्यार्थिनः यथा न कश्चित् पुरञ्जनस्याप्रियमाचरति। प्रत्यासीदति मे कार्यान्तरकाल इति अहमपि गच्छामि।

# पञ्चमः प्रपाठकः

—:o:—

## धातवः—स्वादयः, तनादयश्च
## विधिलिङ्, चतुर्थी

---

## ROOTS OF THE FIFTH AND EIGHTH CONJUGATIONS

THE POTENTIAL MOOD

FOURTH CASE-ENDING

---

### धातवः

( क )

### स्वादयः

आप् *p.* to get ; with प्र conveys the same idea.

चि *u.* to collect ; with अव to pick up ; to pluck.

दु *p.* to afflict ; to produce sorrow.

शक् *p.* to be able.

हि *p.* to send forth ; with प्र gives the same meaning.

( ख )

### तनादयः

कृ *u.* to do.

तन् *u.* to spread ; to perform.

### अन्ये

असूय् *kandvâdi, u.* to envy, to be jealous of, to be displeased with. [jealous of

ईर्ष्य् *bhu. p.* to envy ; to be

धारि *chu. p.* to borrow from ; to owe to.

श्रु (शृ) *bhu. p.* ( conjugated like स्वादि class) to hear.

स्पृह् *chu. p.* to wish, to long for.

स्मृ *bhu. p.* to remember, to recollect.

### शब्दाः

अये *ind.* a vocative particle, a kind of gentle address.

अवश्यम् *ind.* inevitably, certainly,

आपण *m.* a market. [ tion.

आम् *ind.* implies recollec-

उद्यानपाल *m.* उद्यान *n.* a garden, park, पाल a keeper ; a keeper of a garden.

कटक *m. n.* a bracelet.

कदाचित् *ind.* some time or other. [many.

कियत् *adj.* how much, how

कुण्डल *m. n.* an ear-ring.

अलम् *ind.* enough of, away with. [ a toy.

क्रीडनक *m. n.* a play-thing,

क्व *ind.* whither, where,

तथा *ind.* so ; thus. [ tion.

नमस् *ind.* a bow, a saluta-

नु *ind.* implies a question.

पनस *m.* a jack tree, *n.* a fruit of that tree. (ceedinly.

भृशम् *ind.* very much, ex-

शिरीष *m.* a kind of tree, *n.* a flower of that tree.

सज्जन *m.* a good man.

स्वस्ति *ind.* good.

आचार्यः। क्व नु खल्विदानीं पद्मप्रभो भवेत्? वत्स, किं त्वमत्र करोषि, पश्य तावत् किमधुनापि पद्मप्रभो नागच्छति। अये कथमेष इहैवागच्छति। तद् वत्स, अलं गमनेन, कुरु त्वं यत् करोषि।

पद्मप्रभः। तात नमस्ते।

आचार्यः। स्वस्ति ते वत्स। वत्स पद्मप्रभ, त्वमद्य स्नानाय नदीं गच्छेः। तत्र च कृतस्नानः अस्माकम् उद्यान-पालाय कथयेः यद् आयुष्मान् कुशः शिरीषेभ्यः चम्पकेभ्यश्च स्पृहयति। अतस्त्वं तानि कुसुमानि अवचिनुयाः, प्रहिणु-याश्च शीघ्रम्। अहमस्मै बहूनि कुसुमानि धारयामि। तदयम् अद्य यदि तानि न प्राप्नुयात्, तर्हि भृशं मे कुप्येत्। अतस्त्वं नेदं वचनमन्यथा कुर्याः। पद्मप्रभ, अपि शक्नुया-स्त्वम्?

पद्मप्रभः। कथं न शक्नुयाम्? किमत्र दुष्करम्?

आचार्यः। तद् गच्छ त्वं, प्रहिणु चात्रास्माकं भृत्यं संवाहकं नाम।

पद्मप्रभः। एषोऽहं तथा करोमि।

आचार्यः। शृणु संवाहक, त्वमद्य कियद्भ्यो मधुरेभ्यः फलेभ्यः, यथा आम्राय, पनसाय, नारिकेलादिभ्यश्च आपणं गच्छेः। तत्र च वणिजे धनपतये कथयेः, यदहं कुण्डलाय कटकाय च किञ्चित् सुवर्णमिच्छामि, तद् यथाहं तत्

प्राप्नोमि, तथा त्वं कुरु इति। अन्यदपि शृणु, योऽयमस्माकं बन्धुः शीलभद्रो नाम, तस्मै कथयेः, यद् अद्य यदि भवान् अस्माकं गृहमागच्छेत्, तर्हि महती नः प्रीतिर्भवेदिति। वत्स कुश, किं ते नयनं सजलमिव, वदनं च गम्भीरमिव पश्यामि? किं ते अप्रियम्? आं स्मरामि, स्मरामि। संवाहक संवाहक, वत्साय कुशाय किमपि क्रीडनकम् अवश्यमानयेः। इन्दुमति, त्वं पुनरत्र किं करोषि।

इन्दुमती। किमन्यत् करोमि, शृणोमि कुशोऽद्य किं प्राप्नुयादिति।

आचार्यः। ज्ञातं ज्ञातं खेदेन वत्से इन्दुमति। संवाहकस्तुभ्यमपि क्रीडनकमानयेत्। संवाहक, एवं कुर्याः।

संवाहकः। यदादिशति प्रभुः।

कुशः। मा मैवं तात, न प्राप्नुयात् इन्दुमती क्रीडनकम्।

आचार्यः। किं तवापराध्यति इन्दुमती?

कुशः। नहि; नेयं किञ्चित् प्राप्नुयात्, अहमेव सर्वं प्राप्नुयाम्।

आचार्यः। ईर्ष्यसि त्वं वत्स कुश। मैवं कुरु। नहि सज्जन एवं करोति। न कश्चित् केवलं स्वार्थं पश्येत्, न चान्यस्मै ईर्ष्येत्, असूयेद् वा। नीचोऽयमाचारः, न पुनः

साधुः। अकीर्त्तिं चायं तनोति। तद् वत्स कुरु, यदि त्वं पुनरपि कदाचिद् एवं कुर्याः, नाहं त्वया आलपयेम्। दुनोति मामियं ते दुर्बुद्धिः। तद् गच्छ साम्प्रतम्। वत्से इन्दुमति, त्वमपि गच्छ।

---

## षष्ठः प्रपाठकः

—:o:—

धातवः—क्र्यादयः

लङ्, पञ्चमी

---

## ROOTS OF THE NINTH CONJUGATION

PAST TENSE ( *Imperfect*)

FIFTH CASE-ENDING

---

### धातवः

( क )

क्र्यादयः

क्लिश् *p.* to afflict.
ग्रह् *u.* to take.
ज्ञा *u.* to know.
धू *u.* to shake.

पुष् *p.* to nourish; to support.
पू *u.* to purify
प्री *u.* to please,
लू *u.* to cut, to lop.

## ( ख )

### धातवः

दा (यच्छ्) *bhu.* to give. | श्लिष् *div. p.* to embrace.

### शब्दाः

अत्रभवत् *adj.* revered.

अथ *ind.* introduces a question, then.

अदृष्यरमणीय *adj.* अदृष्य *adj* indomitable, *fig.* unbearable ; रमणीय *adj.* pleasant ; unbearable still enjoyable.

अनुरोध *m.* request.

अन्येद्युः *ind.* the other day.

इतः *ind.* here, hence.

कच्चित् *ind.* a particle of interrogation implying hope.

कुतः *ind.* whence.

तत्रभवत् *adj.* revered.

त्रिचतुर *adj.* three or four.

प्रतिपत्र *n.* a letter containing reply.

भवितव्यता *f.* destiny.

वाचिक *n. a* message, an oral communication.

विश्वविदित *adj.* known to the world.

संलाप *m.* discourse.

सहसा *ind.* suddenly.

ह्यस् *ind.* yesterday.

---

विष्णुरातः। अये क एष इत एवागच्छति ? जानामि बन्धुर्मे सोमदत्त इव। हन्त, कथं स एवायम्। अहो सुप्रभाताद्य विभावरी। कच्चित् कुशलं ते सखे सोमदत्त ?

सोमदत्तः। इदानीं कुशलं, यदहं प्रियबन्धुं त्वां पश्यामि च श्लिष्यामि च।

विष्णुरातः। अथ कुत्र त्वम् अगच्छः ?

सोमदत्तः। शृणु यत्राहम् अगच्छम्। ह्यः किल आचार्यचरणा आदिशन्, यथा वत्स सोमदत्त, गृहाणेदं पत्रं, गच्छ च नगरं कौशाम्बीं नाम।

विष्णुरातः। अथ कियद् दूरं तन्नगरं युष्माकं ग्रामात् ?

सोमदत्तः। योजनद्वयं भवेदिति सम्भावयामि। इदानीं तु सुलभं यानमिति दूरोऽप्ययं पन्था न कमपि क्लिश्नाति।

विष्णुरातः। ततः।

सोमदत्तः। ततस्तेऽकथयन्,—जानास्येव तत्रभवान् श्रीधराचार्यस्तत्र निवसतीति। यच्छेदं पत्रं तस्मै, आनय चास्य प्रत्युत्तरम्।

विष्णुरातः। विश्वविदितो महामहोपाध्यायः श्रीधराचार्यः। तत् को नामेदानीं तं न जानाति। ततस्त्वं किमकरोः।

सोमदत्तः। अहमाश्वं तं लेखम्, उदचलं च कौशाम्बीं प्रति, उपागच्छं च क्षणेनैव तत्र।

विष्णुरातः। अथ कथय कथं त्वं तत्रभवन्तं श्रीधराचार्यम् अपश्यः।

सोमदत्तः। सखे किं कथयामि। यत् खलु पूर्वं कर्णेनाशृणवं, तदिदानीं नयनेनैव पर्यालोकयम्। अतिमहा-

मयं श्रीधराचार्यः। तथैवास्य कश्चित् प्रभावम् अपश्यं यथायं दर्शनेनैव पुनाति शरीरम्, धुनाति पापम्, लुनाति च प्रवृत्तिमसतीम्। तथैवास्य मधुरः संलापः यथायं सर्वस्यैव हृदयं प्रीणाति। आश्रय इवायं धर्मस्य, मूर्त्तिरिव च सौजन्यस्य। स्फुरत्ययं निरन्तरं केनाप्यधृष्यरमणीयेन तेजसा, पुष्णाति च वदनमण्डले काञ्चिद् अपूर्वां श्रियम्। सखे विष्णुरात, किं बहुना, अपश्यमहं यद् द्रष्टव्यम्।

विष्णुरातः। नूनं सुप्रसन्ना ते भगवती भवितव्यता, यत् त्वमीदृशं महापुरुषमपश्यः। अथ जानासि कीदृश-स्तत्पत्रार्थः, किञ्चास्य महाभागस्य प्रतिवचनम्?

सोमदत्तः। कथं न जानामि। अस्माकम् आश्रमे किल सारस्वतोत्सवः। तद् यदि अत्रभवन्तः सहान्ते-वासिभिः कृपयागच्छेयुः, अतिमहती भवेन्नः प्रीतिरिति पत्रार्थः।

विष्णुरातः। अथ प्रतिवचनम्?

सोमदत्तः। एवं तेऽकथयन्,—वत्स सोमदत्त, गृहाणेदं प्रतिपत्रम्। कथय चेदं कापिकमाचार्येभ्यः, यथा सारस्वतोत्सवनिमन्त्रणेन महानस्माकम प्रमोदो गौरवं च। इच्छामश्च सर्वे वयम् उत्सवदर्शनानन्दमिति। अथ तदनु-रोधात् तत्रैव तां रात्रिमनयम्। अस्मरं च कौशाम्बी-नगरात् समीपमेव ते गृहमिति। अतस्तस्माद् इह

समागतोऽस्मि। अथ कथय साम्प्रतं कच्चित् कुशलिनस्ते सर्वे परिवाराः ?

विष्णुरातः। मैवं सखे; त्रिचतुरवर्षीयः कनिष्ठः सोदरो मे पुरुषोत्तमो नाम अन्येद्युः सहसा कुक्कुराद् भीतः सोपानादपतत्। तेन भग्न इव दक्षिणो बाहुरिति परं कष्टमनुभवत्येषः। अन्यत् सर्वं कुशलम्।

सोमदत्तः। अथायुष्मान् वासुदेव इदानीं कुतो वा किं वा पठति ?

विष्णुरातः। स इदानीं तत्रभवतः श्रीधराचार्यादेव भक्तिशास्त्रं पठति।

सोमदत्तः। आं स्मरामि, आयुष्मतश्चन्द्रप्रभाद् अपीदम् अशृणवम्, तद् व्यस्मरमिति त्वां पुनरपृच्छम्।

विष्णुरातः। तद् आगच्छ सखे सोमदत्त, अस्मद्गृहम्।

सोमदत्तः। सखे, एवं भवतु। तत् तत्रैव गच्छाव।

# सप्तमः प्रपाठकः

—:o:—

## धातवः—अदादयः

## लृट्, षष्ठी सप्तमी च

---

## ROOTS OF THE SECOND CONJUGATION

### FUTURE TENSE

### SIXTH AND SEVENTH CASE-ENDINGS

——:o:——

### धातवः

### ( क )

### अदादयः

अस् *p.* to be.

इ *p.* to go; with अव to know; with उत् to rise; with उप to go to.

द्रा *p.* to sleep, with नि conveys the same meaning.

ब्रू *u.* to say, to tell.

भा *p.* to shine; with प्रति to seem.

या *p.* to go; with आ to come

रु *p.* to cry; to hum; to sound in general.

वच् *p.* to say, to speak.

विद् *p.* to know.

शी *a.* to lie down.

स्तु *u.* to praise.

स्ना *p.* to bathe.

स्वप् *p.* to sleep.

हन् *p.* to kill.

## ( ख )

### धातवः

ईक्ष् *bhu. a.* to see.

काश् *bhu. a.* to shine ; with प्र to come to light.

क्लम् *div. p.* to be fatigued.

रम् *bhu. a.* to rejoice, with वि *p.* to cease, to come to an end.

मन् *div. a.* to consider.

### शब्दाः

अम्बा *f.* mother.

अवितथ *adj.* true.

आरोपित *adj.* strung.

इह *ind.* here.

उद्वेग *m.* anxiety.

उपादेय *adj.* acceptable.

कनीयस् *adj.* younger.

काममोहित *adj.* infatuated with love.

किरणकलाप *m.* a multitude of rays.

क्रौञ्चमिथुन *n.* a pair of क्रौञ्च, [heron.

चकोरबन्धु *m.* the friend of चकोर, *i.e.* the moon.

जलाञ्जलि *m.* a handful of water, water held in the hollows of the hands.

द्रुतपादक्षेप *adv.* with swift foot-steps.

धिक् *ind.* fie !

नाम *ind.* indeed ; by name.

नियत *adj.* fixed.

निषाद *m.* an outcast tribe, such as hunter, etc. चण्डाल.

निशित *adj.* sharpened.

नैकविध *adj.* various.

नैशविनोदसमय *m.* the time for nightly entertainment.

पञ्चष *adj.* five or six.

प्रतिष्ठा *f.* glory, fame.

भागशः *ind.* in parts.

भास्वत् *m.* the sun.

वराक *adj.* poor, pitiable.

वचस् *n.* a speech.

वल्कल *m. n.* the bark of a tree; a garment made of bark.

शाश्वतीः समाः, शाश्वत *adj.* eternal; समा *f.* a year; for eternal years, for all time to come.

सतीर्थ्य *m.* a fellow student.

सन्देश *m.* news.

समुच्छ्रित *adj.* very high.

सरस्वती *f.* a speech.

सायन्तनकृत्य *n.* the evening duty.

सुष्ठु *ind.* well.

हेय *adj.* that which should be avoided.

---

सोमप्रभः। आचार्य, आचार्य।

आचार्यः। किं ब्रवीषि वत्स।

सोमप्रभः। आचार्य, भवान् खल्वन्येद्युरब्रवीद् यत् सम्पूर्णे रामायणे यूयं तदीयानि चित्राणि विलोकयिष्यथ इति। सम्पूर्णोऽस्माकं रामायणपाठः। तदद्य वयं तानि तानि चित्राणि द्रक्ष्यामः। तदत्र किं ब्रवीति भवान्?

आचार्यः। किमन्यद् ब्रूयां वत्स; नहि जन एकं ब्रूयात्, कुर्याच्चापरम्। ब्रुवन्ति हि साधवः—

मनस्यन्यद् वचस्यन्यत् कर्मण्यन्यद् दुरात्मनाम्।

मनस्येकं वचस्येकं कर्मण्येकं महात्मनाम्॥ इति।

तदवेहि वत्स, यदहमब्रवम्, अवश्यं तत् करिष्यामि। अद्यैव यूयं चित्रपटान् द्रक्ष्यथ।

सोमप्रभः। प्रियं नः प्रियम्। अथ कस्मिन् समये, कस्मिन् वा स्थाने तद् भविष्यति।

आचार्यः। ननु युष्माकं नियते नैशविनोदनसमय एव भविष्यति। स्थानं पुनरस्माकम् अध्यापनवेदिश्चम्पकावती नाम। उदेष्यत्यद्य चकोरबन्धुर्भगवांश्चन्द्रः। अपाकरिष्यति चायं समुज्ज्वलैः किरणकलापैस्तिमिरजालम्। अतो ब्रवीमि तदेव स्थानं चारुतरम्।

सोमप्रभः। तथैवास्तु। एषोऽहं तर्हि गच्छामि, कथयामि चेमं वृत्तान्तं सतीर्थ्येभ्यः।

आचार्यः। गच्छ वत्स, एष भगवान् सहस्रकिरणः अस्ताचलशिखरं प्रयाति। तत् प्राप्तोऽस्माकं सन्ध्योपासनसमयः। अतः कुरुत यूयं सायन्तनकृत्यम्, प्रयात चानन्तरं चम्पकावतीं वेदिम्। अहमपि तथा करोमि।

चन्द्रकेतुः। अये कथमाचार्य इदानीमपि नोपैति ?

श्वेतकेतुः। नन्वलम् उद्वेगेन। एषोऽत्रभवान् द्रुतपादक्षेपमागच्छति। भान्ति चैते चित्रपटा एतस्य पाणौ।

आचार्यः। आयुष्मन्तः, अपि सर्व एव यूयं समुपागताः ?

ब्रह्मचारिणः। अथ किम्; सर्व एव वयं समुपागताः।

आचार्यः। तदलं विलम्बेन। पश्यत यूयम्। एतत् प्रथमं चित्रं रामायणस्य। इयं स्रोतस्वती तमसा नाम। अयं भगवतो वाल्मीकेराश्रमः। एते समुच्छ्रितास्तपोवन-

तरवः। अत्रैते लिखिता नैकविधा आश्रमपशवः। इतः केचन मुनयः स्नानाय तमसामायान्ति, इतः केचन स्नाताः प्रयान्ति, इतश्च केचन स्नान्ति। इह केचित् जलाञ्जलिना स्तुवन्ति भगवन्तं भास्वन्तम्।

विश्वावसुः। अयं पुनरत्र कः।

आचार्यः। न वेद्मि वत्स, कोऽयमिति?

सत्यकामः। अहं वेद्मि आचार्य, अहं वेद्मि।

आचार्यः। ब्रूहि तर्हि त्वरितम्।

सत्यकामः। अयं भगवान् वाल्मीकिः।

आचार्यः। अवितथमाह आयुष्मान् सत्यकामः। अथायं को नाम।

सत्यकामः। क एतत् न वेत्ति। अयं भगवतो वाल्मीकेः शिष्यो भरद्वाजः, यस्य हस्तात् स्नानेच्छुः स भगवान् वल्कलमग्रहीत्। नैतदेवम्?

आचार्यः। एवमेवैतत्, एवमेवैतत्। तत् साधु वत्स, साधु। सुष्ठु खलु स्मरसि रामायणवृत्तान्तस्य।

चन्द्रकेतुः। अथ कुत्र स पापो निषादः, कुत्र वा तद् वराकं क्रौञ्चमिथुनम्?

आचार्यः। नन्वितः पश्य। इदमत्र विद्यते। एष निषाद आरोपितेन धनुषा पर्यटति। एतच्चेह विहरति क्रौञ्चमिथुनम्। इतोऽप्यन्यत्र पश्य। एष दुरात्मा तयोः

क्रौञ्चयोरेकं निशितेन सायकेन हन्ति। हतः स मृतः शेते। इतरस्यान्या सहचरहीना हन्त कथमतिकष्टां दशामनुभवति। हन्त भोः। चित्रेऽप्येषा रौतीव, रोदितीव, क्रन्दतीव चेति प्रतिभाति। अहो नास्ति दुरात्मनाम् अकार्यं नाम किञ्चित्; एते हि हेयमेव उपादेयम्, उपादेयं च हेयमेव मन्यन्ते। सर्वथा धिगेतान् पापासक्तान्। पश्यतेह वत्साः, पुनरपि भगवन्तं वाल्मीकिम्। कथमयमङ्कितः, कथमस्य सर्वस्मिन्नप्यङ्गे क्रौञ्चशोकेन पीड़ा चानुकम्पा च प्रकाशते। अधुनैव हि एतस्य भगवतो वदनकमलान्निर्गतासीत् सा सरस्वती। किं नेदं स्मरथ यूयम्?

ब्रह्मचारिणः। कथं न स्मरामः।

आचार्यः। कथय त्वं चन्द्रकेतो, का सा सरस्वती।

चन्द्रकेतुः। मा निषाद प्रतिष्ठां त्वमगमः शाश्वतीः समाः। ततः—ततः, यत्—यत्—।

विश्वावसुः। अहम्, अहम् ब्रवाणि आचार्य?

आचार्यः। त्वं वक्ष्यसि? अस्तु, ब्रूहि तर्हि।

विश्वावसुः। मा निषाद प्रितष्ठां त्वमगमः शाश्वतीः समाः।
यत् क्रौञ्चमिथुनादेकमवधीः काममोहितम्॥

आचार्यः। साधु वत्स, चारुतरं स्मरसि पाठस्य। अथेदं द्वितीयं चित्रम्।

ब्रह्मचारिणः। नूनमियं नगरी अयोध्या नाम?

आचार्यः। अथ किम्; अयोध्यैवेयम्। भागशः सर्व एवायोध्यावृत्तान्त इहास्ति। अये पुण्डरीक, वत्स त्वं निद्रासि। त्वमपि च चन्द्रसेन स्वपिषीव। इन्द्रप्रभ, त्वमपि शेषे? किं भो विमर्दक, कः सन्देशः?

विमर्दकः। अम्बा ब्रवीति—सम्पन्नः पाको ब्रह्मचारिणाम्। अतो भोजनाय आगच्छन्तु मे वत्सा इति।

आचार्यः। ब्रूत यूयमायुष्मन्तः, किं वयमिदानीं करिष्यामः, किं चित्रमेव द्रक्ष्यामः, उताहो भोजनाय गमिष्यामः?

सोमप्रभः। भगवन् कनीयसां ब्रह्मचारिणां बहव एव क्लाम्यन्ति। चित्राण्यपि प्रभूतानि। नह्येतेषाम् एकेन द्वाभ्यां त्रिचतुरैर्वा पञ्चभिर्वा दिवसैरन्तो भविष्यति। रात्रिर्वर्धते। तत्रभवती अम्बा आचार्यपत्नी वा कियच्चिरमपेक्षिष्यते। तत् कथयामि इहैवाद्य विरमतु चित्रदर्शनं सर्वे वयं क्रमेणावलोकयिष्यामः।

ब्रह्मचारिणः। सुष्ठु वक्ति सोमप्रभः। तत् तथैवास्तु।

आचार्यः। यथा वदन्ति मे वत्साः।

# अष्टमः प्रपाठकः

## धातवः—ह्वादय रुधादयश्च

### क्त्वा, ल्यप्

## ROOTS OF THE THIRD AND SEVENTH CONJUGATIONS

### INDECLINABLE PAST PARTICIPLES OR GERUNDS

#### धातवः

(क)

ह्वादयः

दा *u.* to give.
धा *u.* to hold.
भी *p.* to fear.
भृ *u.* to maintain, to support.
मा *a.* to measure; with निर् to make.
हा *p.* to leave.
हु *p.* to offer an oblation into the fire.

( ख )

रुधादयः

छिद् *u.* to cut, to tear.
भिद् *u.* to split.
भुज् *u.* to eat (*a.*), to protect (*p.*).
युज् *u.* to join.
रुध् *u.* to obstruct.

## ( ग )

### धातवः

इ *ad. a.* with अधि to read.

द्रु *bhu p.* to run ; to melt ; with उप to attack.

लम्ब् *bhu. a.* to hang down ; with वि to delay.

षु *su. u.* to solicit ; with अप+आ to open.

व्यध् *div. p.* to hurt.

शम् *div. p.* to be calm.

शिक्ष् *bhu. a.* to learn.

### शब्दाः

आज्यधारा *f.* आज्य *n.* clarified butter, ghee ; धारा *f.* a line of descending fluid.

ऋत्विज् *n.* a priest who officiates at a sacrifice.

पुण्यावगाह *adj.* that by bathing in which one becomes pure.

पुत्रेष्टि *f.* a sacrifice for obtaining a male issue.

प्राजापत्य *adj.* belonging to प्रजापति, the god presiding over creation.

बृंहित *n.* the roaring of an elephant.

वेणुवेष्टन *n.* वेणु, *m.* a bamboo वेष्टन *n.* a fence, an enclosure, an enclosure made of bamboo.

सम्भ्रम *m.* hurry.

सायक *m*, an arrow.

स्तोक *adj.* little.

हताश *adj.* accursed.

हविस् *n.* an oblation.

हो हो भोः *ind.* a phrase denoting surprise, ah !

आचार्यः । संमर्दक ! संमर्दक ! सहसा किमयं कलकलः ? कथं चायं सम्भ्रमः ? किमिदं सर्वे ततो धावन्ति ? किं

भोः, किं ब्रवीषि, अनिविडेऽपि तमसि सहसा पथि कञ्चित् हस्तिनं दृष्ट्वा, श्रुत्वा च तस्य बृंहितं सर्वा आश्रमगावो भीताश्चकिताश्च, ततश्च काश्चिद् बन्धनदामानि छिन्दन्ति, छित्त्वा च काश्चिद् वेणुवेष्टनानि भिन्दन्ति, भित्त्वा च काश्चिद् बहिर्निःसरन्तीति? कुत्र संवाहकः, विमर्दकः, औदासीनो वा? सर्व एव भृत्यास्तत्र गच्छन्तु, गत्वा च ताः सर्वा रुन्धन्तु। वत्स इन्द्रविजय, त्वमपि तत्र गत्वा पश्य यदेता गावः शाम्यन्ति न वेति।

इन्द्रविजयः। यथादिशत्याचार्यः।

आचार्यः। कथं विलम्बत इवेन्द्रविजयः। अये एष आगच्छति। सौम्य, अपि शान्ता गावः?

इन्द्रविजयः। अथ किम्, शान्ता एव, साम्प्रतम् ताः सरसानि तृणानि भुञ्जते।

आचार्यः। अथ क्वेदानीं मे ब्रह्मचारिणः?

सोमप्रभः। आचार्य, सर्वे ब्रह्मचारिणश्चम्पकावती-मुपेत्य भगवन्तमपेक्षन्ते।

आचार्यः। वत्स, गच्छ त्वमग्रतः, अहमपि विमर्दकं किञ्चिदादिश्य अयमागत एव।

श्वेतकेतुः। आर्य सोमप्रभ, किमब्रवीद् आचार्यः?

सोमप्रभः। अत्रभवान् सत्वरमेवागच्छति। हन्त कथमागत एव। भगवन्निदमासनम्।

आचार्यः। उपविशत वत्साः, उपविशत। सोमप्रभ, अपाहरणु त्वमिमं चित्रपटं गृहीत्वा। पश्यत आयुष्मन्तः, इयं पुण्यावगाह्या स्रोतस्वती सरयूर्नाम। इयमस्यास्तटेऽयोध्या। स्वयं मनुः किलैतां नगरीं निरमिमीतेति वदन्ति। इदं समुन्नतं सुशोभनं च राजभवनम्। एष महाराजो दशरथः। इयमस्यात्र पुत्रेष्टिः। एष भगवान् वसिष्ठः। अयमपि भगवान् ऋष्यशृङ्गः। एते चापरे ऋत्विजः। पश्यत पश्यत, एषां कश्चिद् आज्यधारां जुहोति, कश्चिद् देवेभ्यो हविर्दधाति, कश्चिद् ददाति, दत्त्वा च कश्चिदन्यद् हविर्बिभर्ति। अयं प्राजापत्यः पुरुषो दिव्यपायसपूर्णं पात्रं कराभ्यां धृत्वा होमानलान् निर्गच्छति। अथ पश्चाच्च निर्गत्य महाराजाय दशरथाय तत् पायसपात्रं ददाति। इयं महिषी कौशल्या, इयं कैकेयी, इयं च सुमित्रा। अहो कथं प्रसन्ना एता भुञ्जते पायसम्।

विश्वावसुः। एतत् पुनरत्र किम्?

आचार्यः। इहायं कुमाराणां जन्मोत्सववृत्तान्तः। जानासि वत्स विश्वावसो, के के ते कुमाराः।

विश्वावसुः। किं न जानामि? रामो, भरतः, लक्ष्मणः, शत्रुघ्नश्च।

आचार्यः। ब्रूहि त्वं चन्द्रकेतो, एषु कतमः कतमस्या महिष्याः पुत्रः?

चन्द्रकेतुः । देव्याः कौशल्यायाः कुमारो रामः, देव्याः कैकेय्याः कुमारो भरतः, देव्याः सुमित्रायाश्च कुमारौ लक्ष्मणशत्रुघ्नौ । तत् किं नाहं वेद्मि ?

आचार्यः । वेत्सि वत्स वेत्सि, साधु खलु वेत्सि । अयेह पश्यत यूयमेषां बाल्यवृत्तान्तम् । एते कुमाराः कुलगुरोर्महर्षेर्वसिष्ठात् वेदं शास्त्रान्तराणि चाधीयते, इतश्च स्वजनकादेव धनुर्विद्यां शिक्षन्ते । ननु पश्यत पश्यत कथमेते धनुरादाय लक्ष्यं विध्यन्ति ।

इन्द्रप्रभः । इह पुनरेष कः ?

आचार्यः । एष महर्षिर्विश्वामित्रो महाराजं दशरथं कुमारौ रामलक्ष्मणौ याचते ।

आचार्यः । स्मरसि सत्यकाम, किमभिलष्य महर्षिः कुमारावयाचतेति ?

सत्यकामः । राक्षसा मम यज्ञमुपद्रवन्ति, तत् कुमारौ तान् हनिष्यत इति ।

आचार्यः । एष महर्षिर्नगराद् निर्गत्य कुमाराभ्यां चलति । ही ही भोः ! विश्वावसो, सत्यकाम, पश्यतमिमां राक्षसीं ताटकां नाम ।

विश्वावसुः । अहो हताशायाः भीषणं विकटं च रूपम् । सत्यकाम, अपि बिभेषि त्वम् ? तत् किं न पश्यसि ?

सत्यकामः । को बिभेति, को वा न पश्यति ? किन्तु

यथा वा तथा वा भवतु, यदियमतिभैरवा, न मे तत्र स्तोकोऽपि संशयः।

आचार्यः। अत्रैष रामो धनुर्दधाति, युनक्ति च तत्र निशितान् सायकान्। इयं च दुष्टात्मा प्राणान् जहाति।

सोमप्रभः। प्राप्नोतु पापीयसी परिणामं स्वदुष्कृतस्य।

आचार्यः। आयुष्मन्तः, न जाने कुतोऽपि क्लान्तिमिव किञ्चिदनुभवामीति ब्रवीमि अद्यात्रैवास्तु विराम इति।

ब्रह्मचारिणः। यथा कथयन्त्याचार्यपादाः।

---

# नवमः प्रपाठकः

## तुम्, शतृ, शानच्

## THE INFINITIVE MOOD AND PRESENT PARTICIPLES

### धातवः

ईक्ष् *bhu. a.* to see; with अप to wait for; with परि+अव to take care or inspect; with प्रति to await.

चर् *bhu. p.* with परि to serve, to attend upon.

स्मि *bhu. a.* to smile.

शब्दाः

एतावत् *adj.* so much, so many.

कृते *ind.*, for, on account of.

परिचर्या *f.* attandence.

परिणत *adj.* ripe.

सत्कार *m.* a hospitable reception.

स्मयमान *adj.* one who is [ smiling.

---

चन्द्रहासः। सखे विष्णुरात, कुत्र वा किं वा कर्तुं त्वमेवं द्रुतमिव गच्छसि ?

विष्णुरातः। चन्द्रहास, न त्वं जानासि यदस्माकमाश्रमं द्रष्टुं सम्प्रत्येव कश्चिन् महानतिथिः समायातः ?

चन्द्रहासः। इदानीं खलु त्वन्मुखाज् जानामि।

विष्णुरातः। आचार्यादेशात् तस्यैव महाभागस्य यथोचितं सत्कारं विधातुं गच्छामि। त्वं पुनरिह किं कुर्वन् तिष्ठसि।

चन्द्रहासः। न तावत् किञ्चित् करोमि। अपि त्वस्माकं हारीतनाम्नः शुकशावकस्य कृते परिणतं दाडिमफलं संग्रहीतुमिच्छन् पद्मप्रभमपेक्षमाणस्तिष्ठामि, सोऽपि सह मया गन्तुमिच्छति।

विष्णुरातः। तत् सखे तिष्ठ त्वम्, अहन्तु तमेव महाभागं परिचरितुं व्रजामि।

चन्द्रहासः । वयस्य पद्मप्रभ, किमर्थोऽयं ते एतावान् कालातिपातः ?

पद्मप्रभः । चन्द्रहास, विजयसेनो मामित आगच्छन्तं दृष्ट्वा, श्रुत्वा च मदागमनप्रयोजनं हसन्नकथयत्—इदानीं खलु यूयं दाड़िममानेतुं गच्छथ ? ननु पश्यत गत्वा हारीतो दाड़िमबीजानि भुञ्जानः कथं सानन्दं कूजति । सम्प्रत्येव देवव्रत आश्रमतरुवीथिषु खेलंश्च धावंश्च सहसैव सुपरिणतं दाड़िममेकमवलोक्य स्मयमानः समानयत् । तदलं तदर्थं गमनेन युष्माकम् । एष पुनराचार्यः समागतस्यातिथेः स्वयमेव सर्वां परिचर्यां पर्यवेक्षमाणो मामवदत्, यथा वत्स विजयसेन, मद्वचनात् कथय गत्वा सर्वान् मे अन्तेवासिनो यत् समागतोऽयं महाभागोऽनतिविलम्बितमेव युष्मान् विलोकयितुं गच्छति । अतः सर्वे यूयं चन्द्रमणिवेदिकायां वर्तमानाः प्रतीक्षध्वमस्मानिति ।

विष्णुरातः । तत् किं विलम्बेन, एहि सखे पद्मप्रभ, तत्रैव गच्छाव ।

पद्मप्रभः । वयस्य, तथा करवाव ।

---

# दशमः प्रपाठकः

—:o:—

## णिच्

## THE CAUSAL

### धातवः

बुध् *div. a.* to understand.

मुद् *bhu. a.* to rejoice.

वह् *bhu. a.* to carry.

वृत् *bhu. a.* to be, to exist.

### शब्दाः

उदन्त *m.* news.

व्याधित *adj.* sick.

व्रीहिभार *m.* a load of rice.

शष्पकवल *m. n.* शष्प *n.* young grass, कवल *m. n.* a mouthful; a mouthful of young grass.

राशि *m.* a heap.

ह्यस् *ind.* yesterday.

---

आचार्यः। वत्स सोमप्रभ, ह्यः किल अतिथिविशेषागमनात् नाहं रामायणचित्रं दर्शयितुं प्राभवम्, अद्य पुनर्युष्मान् तद् दर्शयिष्यामि बोधयिष्यामि च सर्वं वृत्तान्तम्।

सोमप्रभः। नूनमियं वार्ता सर्वान् नः प्रमोदयिष्यति। अथाद्य कतमस्यां वेदिकायाम् आचार्यचरणानाम् आसनं स्थापयिष्यामि ?

आचार्यः । वत्स श्रीवेदिकायामेव स्थापय ।

सोमप्रभः । भगवन्, एषोऽहं ब्रह्मचारिणस्तद् विश्रापयामि, गमयामि च तान् तां वेदिम्, स्थापयित्वा च तत्रासनम् आचार्यचरणान् तमुदन्तं निवेदयिष्यामि, ततो गमिष्यन्ति भवन्तः ।

आचार्यः । आयुष्मन्, तथा कुरु । भद्र विमर्दक, अपि त्वं तमस्माकं व्याधितं नवीनं गोवत्सं नन्दनं नाम शष्पकवलमभोजयः, सलिलञ्च अपाययः ?

विमर्दकः । अथ किम्, अभोजयं तमहं शष्पकवलम्, अपाययं च सलिलम् । सुखमेष साम्प्रतं वर्तते ।

आचार्यः । प्रियं मे विमर्दक, प्रियम् । भद्र, इमं तावद् व्रीहिभारं संवाहकेन सुहृदो मे श्रीपतिशर्मणो गृहं वाहय, अन्यं वा कमपि भृत्यमेतत् कारय । संमर्दकेन च शुष्काणामेतेषां यवानां राशिं कारय । कथं प्रत्यागच्छति सोमप्रभः ? वत्स सोमप्रभ, अपि सर्वे सङ्गता यूयं तत्र ।

सोमप्रभः । एवमिदम्, सर्व एव तत्र भवन्तमपेक्षन्ते ।

आचार्यः । तर्हि गृहाणेमं चित्रपटं, तत्रैव गच्छामः ।

# एकादशः प्रपाठकः

—— :o:——

## भावकर्मप्रक्रिया:

## IMPERSONALS AND PASSIVES.

### धातवः

कृ *tan. u.* with सत् to respect. to receive hospitably.

क्षिप् *ind. u.* to throw.

गल्भ *bhu. a.* with प्र to be bold or proud.

दिह् *ad. u.* to smear ; with सम् to doubt.

दीप् *div. a.* to shine.

धाव् *bhu. u.* to run.

भास् *bhu. a.* to shine ; with सम्+उत् to shine intensely,

क्षम् *div. u.* to forgive.

लोक *bhu. a.* लोकि *chur. p.* with अव् to see.

सद् *bhu. p.* with वि to be sorrowful.

### शब्दाः

कतिचित् *adj.* some, several.

जृम्भकास्त्र *n.* a kind of fabulous weapon which makes an enemy yawn.

दिव्य *adj.* divine.

बाढम् *ind.* certainly ; oh yes,

आचार्यः । अहो सर्वेऽपि मे विद्यार्थिनः समुत्सुका दृश्यन्ते । तद् दृश्यतामिदं युष्माभिः ।

विश्वावसुः। अथ किमेतदत्र वर्तते ?

आचार्यः। किं न त्वयेदं ज्ञायते ? ननु स्मर्यतां तावत्। किं वत्स सत्यकाम, अपि बुध्यते त्वयेदम् ?

सत्यकामः। बाढम्, बुध्यत एवेदं मया। अत्र खलु भगवता विश्वामित्रेण रामचन्द्राय दिव्यान्यस्त्राणि प्रदीयन्ते। इह चैतानि समुद्भासन्ते जृम्भकास्त्राणि।

आचार्यः। इहापीदमवलोक्यतामायुष्मद्भिः। अयं दुरात्मा निशाचरो मारीचो नाम, अयं च दुर्वृत्तः सुबाहुः। अहो भीषणत्वमेतयो रूपस्य। हन्त चित्रेऽपि कथं दीप्यत इव नयनाभ्याम्। पश्चात्त्र रामेण निशिताः शराः क्षिप्यन्ते, इह च प्राणभयात् द्रुतं धाव्यते पापीयसा मारीचेन।

विश्वावसुः। इहाप्येष म्रियते दुरात्मा सुबाहुः, अन्येऽपि च कतिचिद् राक्षसाः।

इन्द्रविजयः। विलोक्यतामत्र, एष सलक्ष्मणो रामो राक्षसवधानन्दितैः सिद्धाश्रमवासिभिर्मुनिभिः कथं सत्क्रियते।

आचार्यः। इहापि दृश्यतां वत्सैः। अयं मिथिलावृत्तान्तः। इदमभज्यत शिवशरासनं रामेण। दृष्ट्वा चेदं कथं सर्वैर्विस्मितैः स्थीयते।

विश्वावसुः। काभिः पुनरेताभिः कन्यकाभिर्भूयते।

सत्यकामः। हन्त भोः, न किञ्चिद् स्मर्यते विश्वावसुना।

आचार्य। वत्स विश्वावसो, नैवं त्वां सत्यकामः कथयितुमर्हति, तदुच्यतां त्वया काः खल्वेताः कन्यका भवन्तीति।

विश्वावसुः। आचार्य, स्मरामीव सर्वम्, क्षणमपि श्रूयतां सर्वैः, न केनापि कथ्यताम्, एषोऽहमेव कथयामि। इयं सीता, इयं माण्डवी, इयमूर्मिला, इयमपि श्रुतकीर्त्तिः। नैतदेवम् ?

आचार्यः। एवमेवायुष्मन् एवमेव। अथ कथय त्वमिदानीं सत्यकाम, आसु खलु राजकुमारीषु कतमा नाम केन नाम राजकुमारेण पर्यणीयतेति।

सत्यकामः। एष कथयामि—रामचन्द्रेण सीता, भरतेन माण्डवी शत्रुघ्नेनोर्मिला—।

विश्वावसुः। अति हि नाम प्रगल्भसे त्वं सत्यकाम, सुष्टु खलु कथ्यते त्वया ऊर्मिला किल शत्रुघ्नेन पर्यणीयतेति। ननु तर्हि कुमारो लक्ष्मणः श्रुतकीर्त्तिं पर्यणयदिति कथयिष्यसि ?

सत्यकामः। को नाम मूढ़ एवं कथयिष्यति, कथयति वा। ननु मृष्यतामिदमेकं स्खलितम्। को नाम जनो न स्खलति। ब्रवीमि—लक्ष्मण ऊर्मिलां पर्यणयत्, शत्रुघ्नश्च श्रुतकीर्त्तिम्।

आचार्यः। किं भद्र संवाहक, किं कथयसि ?

संवाहकः। स्वामिन्, स खलु गोवत्सो नन्दनो नाम

व्याधित इव दृश्यते, जीविष्यत्येष न वेति सन्दिह्यतेऽस्माभिः। तद् भवानपि तावदेनं द्रष्टुमर्हतीति निवेदयामि।

आचार्यः। भद्र, गच्छ त्वं तत्र, एषोऽहमपि गच्छामि। आयुष्मन्तः, सहसा प्रतिबध्यतेऽद्य युष्माकं चित्रदर्शनमिति विषीदामि, का गतिः, अन्येद्युः पुनः सर्वं दर्शयिष्यामि।

---

## द्वादशः प्रपाठकः

—:o:—

### निष्ठाप्रत्ययः

---

### PAST PARTICIPLES

---

#### धातवः

फल् *bhu. p.* to be fulfilled.

वृध् *bhu, a.* to grow; to thrive.

सृ *bhu. p.* to go; with प्र to spread; with अनु to follow.

स्था *bhu. p.* with प्र *a.* to go.

#### शब्दाः

आः *ind.* implying anger.

आचन्द्रसूर्य्य *adv.* as long as the sun and the moon exist.

करुणतर *adj.* very pathetic.

काष्ठा *f.* a quarter of the sky a limit; परा काष्ठा the last llmit.

कृतदारपरिग्रह *adj.* married.
दारपरिग्रह *m.* marriage.
तपस्विन् *m.* an ascetic ; *adj.* poor, pitiable.
दिष्ट्या *ind.* fortunately.
दुर्वृत्त *adj.* wicked.
पात्र *n.* worthy to receive gifts.
बाष्पपरिप्लुत *adj.* flooded or overwhelmed with tears.
महिषी *f.* the principal queen.
वज्रसारमय *adj.* made of the essential part of a thunderbolt.
विश्वम्भर *m.* one who holds or maintains the universe.
शीर्णदेह *adj.* one with a weak body.
सहस्रधा *ind.* in a thousard, [ parts.
स्नुषा *f.* a daughter-in-law.

आचार्यः। दिष्ट्या न मृतस्तपस्वी नन्दकः। महत्यस्य विपत्तिर्गता। नूनं प्रसन्नो भगवान् विश्वम्भरः, अन्यथा प्रायो गतवन्त एवास्य प्राणाः। अतिविषमा खलूत्पन्ना मे चिन्ता। भवतु, सुखमेष साम्प्रतं वर्धताम्। वत्स इन्द्रविजय, प्रासाद्य तिथिः प्रतिपद् नाम, तदद्य अनध्याय इति कथयामि ब्रूहि मद्वचनात् स्वसतीर्थेभ्यो यदधुनैव वः शिष्टानि चित्राणि दर्शयिष्यामीति सर्वे यूयमागन्तुमर्हथ इति।

इन्द्रविजयः। यदादिशन्त्याचार्यचरणाः। ब्रह्मचारिणस्तु इदमेव कामयमाना देवदारुद्रुमान्तराले तिष्ठन्ति। विश्वावसुरस्माकं पश्चादेवासीत्। स तु श्रुत्वैव भवदादेशं द्रुतं धावितः सर्वानाहूय हर्षोत्फुल्ललोचन एष पुरत आगच्छति।

आचार्यः। अहो चपलतापीयं वत्सस्य प्रीतिं मे

समुत्पादयति। आगच्छत आयुष्मन्तः, आगच्छत। अपि सर्वैर्युष्माभिः समुपस्थितम्?

विजयसेनः। अथ किम्, सर्वे एव समुपस्थिता वयम्।

आचार्यः। वत्स सोमदत्त, प्रसारयेमं चित्रपटम्। पश्यत वत्साः पश्यत। एते कृतदारपरिग्रहा रामादयश्चत्वारो भ्रातरः समागतवन्तोऽयोध्याम्। एता रघुकुलमहिष्यो नववधूरादाय परां प्रीतिमधिगतवत्यः। इहायं महाराजो दशरथः पात्रेभ्यो दानानि प्रयच्छति। पुत्रांश्च पुत्रवधूश्चाधिगतवतः फलितमिदानीमेतस्य मनोरथेन। अन्यदपि दृश्यतां श्रीमद्भिः, हन्त कथं प्रवृत्तमत्र रमणीयेन महोत्सवेन।

सत्यकामः। मन्ये, अयं पुनरत्र राज्याभिषेकवृत्तान्तो लिखितः।

आचार्यः। एवमिदम्, कः सन्देहः।

विश्वावसुः। इयं दुर्वृत्ता मन्थरा।

सत्यकामः। धिक् पापीयसीम्। अहो स्वभावानुरूपं रूपमस्याः। म्रियस्व हताशे, म्रियस्व।

आचार्यः। सौम्य सत्यकाम, महत् सौभाग्यं मन्थरायाः, यस्यास्त्वमीदृशान् स्वस्तिवादान् उच्चारयसि। अथवा नैतादृशस्य जनस्य भाग्यमन्यथा भवति। यथा वा भवतु। दृश्यतां तावत्। इयं कैकेयी। एष रामनिर्वासनशोककातरः

शय्यामधिशयितो महाराजः। एषा छिन्नमूला कदलीव धूल्यवलुठिता महिषी कौसल्या। एतौ कुमारौ रामलक्ष्मणौ, सेयं राजपुत्री राजस्नुषा सीता च वनं प्रतिष्ठन्ते। इमे स्निग्धाः पौरा जानपदाश्चताननुसृतवन्तः।

ब्रह्मचारिणः। अहो करुणतरोऽयमयोध्यावृत्तान्तः! आः पापे मन्थरे, कथं सहस्रधा न दीर्णा ते जिह्वया। हा पापीयसि कैकेयि, नूनं पाषाणमयमिव वज्रसारमयमिव च ते हृदयं निर्मितं विधात्रा। आचन्द्रसूर्यं किलायं ते जनापवादः।

आचार्यः। आयुष्मन्तः, पश्यत तावत् प्रकृतिं कैकेय्याः पुत्रस्य कुमारस्य भरतस्य। अहो महान् भेदो जनन्याः पुत्रस्य। एष चित्रकूटमाश्रितो रामः। अयं तत्पदतल-पतितः शीर्णदेहो वाष्पपरिप्लुतो भरतः। एष भरतो रामपादुकां मूर्धनि गृहीत्वा प्रतिनिवृत्तो नन्दिग्राममुपागतः, अत्र च तां पादुकां प्रतिनिधिमिव रामस्य सिंहासने स्थापयित्वा राज्यं परिपालयति। अहो माहात्म्यं भरतस्य। सर्वथा जितं जितमेतस्य भ्रातृसौहार्देन। निर्मलम्—अतिनिर्मलं चरित्रमेतस्य। नैतादृशोऽपरः कश्चिद् भूतो भविष्यति वा। आयुष्मन्तः, अलमिदानीं चित्रान्तरदर्शनेन, दृष्टा खल्वस्माभिः परा काष्ठा द्रष्टव्यानाम्। न च चित्रकरेणाद्यापि प्रदत्ताः परे चित्रपटाः। तदिहैवाद्य विरम्यताम्।

# त्रयोदशः प्रपाठकः

—:o:—

## कृत्यप्रत्ययः

---

## POTENTIAL PASSIVE PARTICIPLES

---

### धातवः

इष् *tud.* or *div. p.* with अनु to seerch for.

ज्ञा *kri.* with अनु allow.

शुष् *div.* to become dry.

### शब्दाः

अनुष्ठेय *adj.* that which should be performed.

अन्वेष्टव्य *adj.* that which should be searched for.

उपकरण *n.* meterial. [colour.

कषाय *m.* a kind of red

कालक्षेप *m.* delay.

निर्मेय *adj.* that which ought to be made.

पालाश *adj.* made of the पलाश wood.

मेखला *f.* a belt.

मौञ्ज *adj.* made of मुञ्ज, a kind of grass.

शिष्ट *adj.* remaining.

श्वस् *ind.* to-morrow.

समिध् *f.* wood for the sacred fire.

सोमदत्तः । श्वः किलायुष्मतो ब्रह्मव्रतस्योपनयनम् । अनुज्ञातं चेदमाचार्येण । तदस्माकं संग्राह्याणि सर्वाण्युपकरणानि । कुतो नु खल्विदानीं विजयसेनो भवेत् । न हि

तं विना शक्यमस्माभिः किमपि कर्त्तुम्। तदन्वेष्टव्योऽयम्। गच्छ त्वं विष्णुरात, पश्य च कुत्रायम्।

विजयसेनः। सखे सोमदत्त, न केनापि कुत्रापि गन्तव्यम्, एषोऽहमागतः। ननु पृच्छामि किं मे कार्यमापतितम्? किं वा मयेदानीं कर्तव्यम्?

सोमदत्तः। मन्ये न किञ्चिज्जानासीव सखे विजयसेन। ननु श्वः किलायुष्मतो ब्रह्मव्रतस्योपनयनम्, अतः समाहरणीयान्युपकरणानीति ब्रवीमि।

विजयसेनः। एतावदेव? तद् अलमावेगेन। सर्वं विधेयं व्यवस्थाप्यं च मया। बहवः खलु भवामो वयम्। पश्यत एव सर्वं सम्पत्स्यते। एषोऽहं निर्दिशामि केन किं करणीयमिति। सत्यकाम, ननु त्वया, त्वया च विश्वावसो, उभाभ्यामपि प्रचुराणि पुष्पाणि चेतव्यानि। त्वया सोमप्रभ, समिध आहर्तव्याः। त्वया तु भद्रसेन, समानेतव्याः कुशाः। ब्राह्मणकुमार आयुष्मान् ब्रह्मव्रत इति पालाशो दण्डः कार्यः। तत् सखे विजयगुप्त, संग्राह्यस्त्वयायं दण्डः। त्वया तु धर्मरक्षित, कार्पासं वस्त्रं कषायेण रञ्जयित्वा प्रसारणीयमातपे यथेदं त्वरितमेव शुष्यति। मेखला पुनः कस्य निर्मातव्या? भवतु, अयं चन्द्रकेतुर्विद्यते। भ्रातः चन्द्रकेतो, जानास्येव यथा ब्राह्मणेन ब्रह्मचारिणा मौञ्जी मेखला धारणीयेति। अतस्त्वया चन्द्रहासेन सह सैव

निर्मेया। यानि पुनरपराणि करणीयानि, तानि सर्वाणि इन्द्रविजयादिभिः शिष्टैरस्माभिरेव सम्पाद्यानि। तत् क्षतं कालक्षेपेण, गच्छत यूयं, अनुतिष्ठत च यदनुष्ठेयम्।

## चतुर्दशः प्रपाठकः

—:o:—

### विविधम्

### (क)

## MISCELLANY

### (A)

दा (यच्छ्) *bhu. u.* to give.

धा *hu. u.* with वि to make; to prescribe.

वप् *bhu. p.* to sow seed.

वर्जि *chu. p.* to abandon; to give up.

शब्दाः

अग्लास्नु *adj.* one who does not become languid.

अञ्जन *n.* black pigment used to paint the eye-lashes.

अनसूयु *adj.* not envious.

अप्रतिलोमयत् *adj.* not antagonising; not displeasing.

अभ्यञ्जन *n.* smearing the body with oily substance.

अम्लान *adj.* eternal.

अहरहः *adv.* every day.

आचार्याधीन *adj.* subject to the आचार्य.

उपदेश्य *adj* one who must be advised.

उपनीत *adj.* a youth led to the आचार्य and invested with the sacred thread.

उपानह् *f.* a shoe.

ऐहिक *adj.* secular, worldly.

गन्ध *m.* a perfume.

दान्त *adj.* one who has subdued his इन्द्रियs.

पतनीय *adj.* that by which one is led to downfall.

बीज *n.* origin, source.

मन्तव्य *adj.* that which should be thought over.

यथार्थ *adj.* true.

यथाविधि *adv.* duly.

यावदर्थभाषिन् *adj.* one who speaks as much as is necessary.

वादित्र *n.* instrumental music.

वेदवाद *m.* a saying of the वेद.

शान्त *adj.* one who has restrained his mind.

शुचि *adj.* pure.

संयत *adj.* one who has restrained his passions.

ह्रीमत् *adj.* modest.

आचार्यः। वत्स, ब्रह्मव्रत, उपनीतोऽसि त्वं साम्प्रतम्। तद् उपदेष्टव्योऽसि।

ब्रह्मव्रतः। उपदिशतु मामाचार्यः।

आचार्यः। वत्स, ब्रह्मचर्यं नाम महत्तमं पवित्रतमं च व्रतम्। मूलमिदमैहिकस्य पारलौकिकस्य च सर्वस्यापि श्रेयसः, बीजमिदं सर्वस्यापि यथार्थस्याभ्युदयस्य। वत्स, शिशुरसि साम्प्रतम्, न शक्ष्यसि तत्त्वमस्य सम्यगवबोद्धुम्। तथापि किञ्चित् कथयामि। अस्ति खलु वेदवादः—

"ब्रह्म ह वै मृत्यवे प्रजाः प्रायच्छत्। अस्मै ब्रह्मचारिणमेव न प्रायच्छत्।" *

---

* शतपथब्राह्मणम्, ११. ३. ३. १.। गोपथब्राह्मणेऽप्येवम् (पूर्व. २. ७)—
"ब्रह्म ह वै प्रजा मृत्यवे सम्प्रयच्छत् ब्रह्मचारिणमेव न सम्प्रददौ।"

ईश्वरः किल ब्रह्मचारिणं विना सर्वेषामेव जनानां मृत्युं विहितवान् इति ह्यस्य वाक्यस्यार्थः। देवाः किल ब्रह्मचर्येण तपसा मृत्युमपहतवन्त इत्यपि श्रूयते वैदिकवचनेषु। * वत्स, नेदमन्यथा मन्तव्यम्। मर्त्योऽप्ययं जनः अमृतं भगवन्तमीश्वरमधिगम्य नन्वमृत एव भवतीति ज्ञास्यसि यथाकालम्। ब्रह्मचर्यव्रते तस्यैव बीजमुप्यते। तद् वत्स ब्रह्मव्रत, नियमेन त्वयेदं पालनीयम्।

ब्रह्मव्रतः। भगवन्, यथा कथयसि तथा करिष्यामि।

आचार्यः। साधु वत्स, साधु। शनैः शनैः सर्वं कथयिष्यामि, शिक्षयिष्यामि च। अद्य तु ब्रह्मचारी कीदृशो भवेदिति किञ्चित् कथयामि :—

"आचार्याधीनः स्यात्।
अन्यत्र पतनीयेभ्यः। †
हितकारी गुरोः।
अप्रतिलोमयन् वाचा। ‡
अदिवास्वापी।" §

---

* "ब्रह्मचर्येण तपसा देवा मृत्युमपाघ्नत"—अथर्ववेदसंहिता, ११. २. ११. २०।

† पतनीयेभ्यः पतनसाधनेभ्यः सुरापानादिभ्यः कर्मभ्यः अन्यत्र: अन्येषु कर्मसु ब्रह्मचारी आचार्याधीनः स्यात्, न तु पतनीयेषु कर्मसु इत्यर्थः।

‡ वाक्येन आचार्यस्य प्रातिकूल्यम् अकुर्वन् वर्तेत इत्यर्थः। न तथा वाक्यमुच्चारयेत् येन आचार्यः प्रतिकूलो भवेदिति भावः।

§ आपस्तम्बधर्मसूत्रम्, १. १. २, १९, २०, २४ ; २७।

"उत्सन्नश्लाघः । *

मृदुः ।

शान्तः ।

दृढधृतिः †

अग्लासुः । ‡

अक्रोधनः ।

अनसूयुः ।" §

"सत्यवादी ।

ह्रीमान् ।

अनहङ्कारः ।

नृत्यगीतवादित्रगन्धमाल्योपानच्छत्रधारणाञ्जनाभ्यञ्जन-वर्जी ।" ||

परिवर्जनीयं च ब्रह्मचारिणा मद्यपानं, मांसभोजनं, उच्छिष्टभोजनं, प्राणिहिंसा, अश्लीलवचनं च । ¶

न च किञ्चित् ब्रह्मचारी तथा कुर्यात् येनास्य शारीरं मानसं च तेजो वा शक्तिर्वा विनश्येत् ।

---

* उत्सन्ना विनष्टा श्लाघा शोभा विलासो यस्य सः, विलासरहित इत्यर्थः ।

† "लब्धे नष्टे मृते वा धृताविवास्थितः स्यात् न हृष्येत् न च विषीदेत्"—टीका ।

‡ "उत्साहसम्पन्नः" ।—टीका ।

§ आपस्तम्बधर्मसूत्रम् १. १. ३. १०, २२—२४ ।

|| बौधायनधर्मसूत्रम्, १. २. २१—२५ ।

¶ "मधुमांसाञ्जनोच्छिष्टप्राणिहिंसाश्लीलपरिवर्जनम्"—विष्णुसंहिता, २८. ११ ।

अहरहर्ब्रह्मचारी शुचिः संयतश्च शुचौ देशे उपविश्य उभयोः सन्ध्ययोर्यथाविधि ईश्वरोपासनां कुर्यात् ।

इहैवाद्य विरम्यताम् । तद् गच्छ वत्स साम्प्रतम्, कथय चान्येभ्यो ब्रह्मचारिभ्यो यदागच्छत यूयं पाठाय ।

---

## पञ्चदशः प्रपाठकः

### विविधम्

( ख )

---

## MISCELLANY

( B )

---

### धातवः

कीर्ति *chu.* to utter, to praise.

कृत् *tud. p.* to cut.

चिर *námadhátu u.* to delay.

ज्ञा *kri. u.* with अव to disregard.

त्वर् *bhu. a.* to hurry.

मन् *div. a.* with अव to despise, to disregard.

यम् ( यच्छ् ) *bhu. p.* with उत् to raise.

लिख् *bhu. p.* with आ to scratch.

हस् *bhu.* with अव to deride; to laugh.

हृ *bhu. u.* with परि to abandon.

## शब्दाः

अतिगुरु *m.* a very respectable person.

अनुज्ञात *adj.* permitted.

अभिजन *m.* a family.

अवेक्षिन् *adj.* one who sees.

आचारसेविन् *adj.* one who practises observances.

उपवीत *n.* the sacred thread worn by the first three classes of the Hindus.

उपसृष्ट *adj.* visited by calamities or infested by wild beasts. [ to live.

जिजीविषु *adj.* one wishing

जीर्णमलवद्वासस् *adj.* जीर्ण *adj.* tattered, मलवत् *adj.* unclean, वासस् *n.* a cloth, clothes; one wearing tattered and unclean clothes.

तृणच्छेदिन् *adj.* one who unnecessarily tears grass.

द्युत *n.* gambling.

नाशन *adj.* destructive.

निरोध *m.* suppression.

परवश *adj.* dependent.

परीवाद *m.* blame.

पातक *n.* sin, crime.

प्रियहित *n.* or *adj.* that which is pleasing and good.

बुद्ध *pp.* understood.

मैत्री *f.* friendship.

विपर्यय *m.* a reverse.

विभव *m.* wealth.

वृथा चेष्टा *f.* वृथा *ind.* useless, चेष्टा *f.* movement; useless movement of body.

लोष्टमर्दिन् *adj.* one who unnecessarily crushes a clod.

शुश्रूषु *adj.* desirous of serving; obedient.

श्रुत *n.* holy learning or learning in general.

समास *n.* brief.

सीदत् *adj.* being in distress.

सुगम *adj.* easy to understand.

सुघोर *adj.* very terrific.
स्निग्ध *adj.* loving, friendly.
स्वाध्यायविरोधिन् *adj.* स्वाध्याय *m.* sacred study, विरोधिन् *adj.* obstructive ; obstructive to sacred study.
हीन *adj.* low.
हीनाधिकाङ्ग *adj.* one with a defective or a redunadnt limb.

आचार्यः । वत्स सत्यकाम:, किं चिरयति विश्वावसुः ?

सत्यकामः । अहमपि तदेव चिन्तयामि । स खलु पुस्तकमानेतुमगच्छत् । किमहं तं द्रष्टुं गमिष्यामि ? अथवा कृतं गमनेन, एष स धावन्नागच्छति ।

आचार्यः । वत्स विश्वावसो, किञ्चिद् विलम्बितमिव त्वया ! तत् त्वर्यताम्, अवधीयतां च सर्वैः :—

"त्रयः पुरुषस्यातिगुरवो भवन्ति ।
माता, पिता, आचार्यश्च ।
तेषां नित्यमेव शुश्रूषुणा भवितव्यम् ।
यत् ते ब्रूयुस्तत् कुर्यात् ।
तेषां प्रियहितमाचरेत् ।
न तैरननुज्ञातः किञ्चिदपि कुर्यात् ।" *

आचार्यः । आयुष्मन्तः, अपि बुद्धमिदं सर्वम् ?

ब्रह्मचारिणः । सुगममिदम् । तत्सर्वमेव बुद्धम् ।

---

* विष्णुसंहिता, ३१. १—६ ।

आचार्यः। भद्रं वः, ततः परं पठामः—

"अथ पुरुषस्य कामक्रोधलोभाख्यं रिपुत्रयं सुघोरं भवति।

तेनायमाक्रान्तः ( सर्वेष्वेव पातकेषु ) प्रवर्तते।" *

अत एव तत्वविदो वदन्ति—

"त्रिविधं नरकस्येदं द्वारं नाशनमात्मनः।

कामः क्रोधस्तथा लोभस्तस्मादेतत् त्रयं त्यजेत्॥" †

नेदं विस्मरणीयं श्रीमद्भिः। तदिदानीं शृणोमि तावत्, पठ्यतां यत् पूर्वमेव पठितं युष्माभिः।

ब्रह्मचारिणः। एते पठामः—

"अथ न कञ्चनावमन्येत।

न च हीनाधिकाङ्गान् मूर्खान् हीनान् अवहसेत्।

न हीनान् सेवेत।

स्वाध्यायविरोधि कर्म न कुर्यात्।

वयोऽनुरूपं वेषं कुर्यात्।

श्रुतस्याभिजनस्य धनस्य देशस्य च।

नोद्धतः।

नित्यं शास्त्रार्थवेदी स्यात्।

सति विभवे न जीर्णमलवद्वासाः स्यात्।

न भुवमालिखेत्।

---

* विष्णुसंहिता, ३३. १. २।

† „ ३३. ६; भगवद्गीता, १६. २१।

न लोष्टमर्दी स्यात् ।

न तृणच्छेदी स्यात् ।

न दन्तैर्नखलोमानि छिन्द्यात् ।

द्यूतं वर्जयेत् ।

वस्त्रोपानहमाल्योपवीतान्यन्यधृतानि न धारयेत् ।

नाधार्मिकजनाकीर्णे ( स्थाने निवसेत् ) ।

न संवसेद् वैद्यहीने ।

नोपसृष्टे ।

न वृथाचेष्टां कुर्यात् ।

नाश्लीलं कीर्तयेत् ।

नानृतम् ।

नाप्रियम् ।

न कञ्चन मर्माणि स्पृशेत् ।

नात्मानमवजानीयाद् दीर्घमायुर्जिजीविषुः ।

चिरं सन्ध्योपासनं कुर्यात् ।

परस्य दण्डं नोद्यच्छेत् ।

शास्यं शासनार्थं ताडयेत् ।

देवब्राह्मणशास्त्रमहात्मनां परीवादं परिहरेत् ।

धर्मविरुद्धौ चार्थकामौ ।

एवमाचारसेवी स्यात् ।" *

---

* द्रष्टव्या—विष्णुसंहिता, ७१. १—८९ ।

आचार्यः। विरम्यताम्। गच्छत यूयम्। वत्स धर्मरक्षित, साम्प्रतं युष्माकमेवावसरः, तदागच्छत। कस्य शास्त्रस्याद्य वः पाठः?

धर्मरक्षितः। भगवन्, धर्मशास्त्रस्य।

आचार्यः। एवमस्तु। पठन्तु मे वत्साः—

"न सीदन्नपि धर्मेण मनोऽधर्मे निवेशयेत्।
अधार्मिकाणां पापानामाशु पश्यन् विपर्ययम्॥
नाधर्मश्चरितो लोके सद्यः फलति गौरिव।
शनैरावर्तमानस्तु कर्तुर्मूलानि कृन्तति।
यदि नात्मनि पुत्रेषु, न चेत् पुत्रेषु नप्तृषु।
न त्वेव तु कृतोऽधर्मः कर्तुर्भवति निष्फलः॥" *

अन्यच्चायुष्मन्तः—

"यद् यत् परवशं कर्म तत्तद् यत्नेन वर्जयेत्।
यद् यदात्मवशं तु स्यात् तत्तत् सेवेत यत्नतः॥
सर्वं परवशं दुःखं, सर्वमात्मवशं सुखम्।
एतद् विद्यात् समासेन लक्षणं सुखदुःखयोः॥" †

इदञ्च मन्तव्यं स्मर्तव्यं चानुदिनम्—

"सन्तोषं परमास्थाय सुखार्थी संयतो भवेत्।
सन्तोषमूलं हि सुखं दुःखमूलं विपर्ययः॥" ‡

---

* मनु. ४. १७१—१७४। † मनु. ४. १५९—१६०।

‡ मनु ४. १२।

नहि कश्चित् सुखं सुखमिति धावन् सुखमधिगच्छति। यदि सन्तोषो न स्यात्, न स्यात् तस्य लेशोऽपि सुखस्य। अतः सुखार्थी अवश्यं सन्तोषं सेवेत, आश्रयेच्च संयमम्। संयमो नाम कामस्य अत्यधिकाकाङ्क्षायाः तृष्णायाः संयमनं, निरोधः। अथ इन्द्रविजय, युष्माकमद्य किं स्यात्।

इन्द्रविजयः। अद्यास्माकं यजुर्वेदसंहितायाः पाठः।

आचार्यः। एवं भवतु। श्रूयतामयं मन्त्रः—

"—मित्रस्य मा चक्षुषा सर्वाणि भूतानि समीक्षन्ताम्। मित्रस्याहं चक्षुषा सर्वाणि भूतानि समीक्षे। मित्रस्य चक्षुषा समीक्षामहे।" *

यथा कश्चिद् बन्धुः स्वकीयं बन्धुं स्निग्धेन चक्षुषा समीक्षते सम्यक् पश्यति, एवमेव सर्वाणि भूतानि 'मा' मां 'मित्रस्य' बन्धोः चक्षुषा 'समीक्षन्ताम्' सम्यक् पश्यन्तु। अहमपि सर्वाणि भूतानि मित्रस्य चक्षुषा 'समीक्षे' सम्यक् पश्यामि। अत इत्थं वयमन्योन्यं मित्रस्य चक्षुषा समीक्षामहे। सर्वाणि भूतानि मम मित्राणि भवन्तु, अहमपि सर्वेषां भूतानां मित्रं भवानि। तथा च महती मे विश्वमैत्री जायतामिति भावार्थः। चिन्तयत विचारयत चायुष्मन्तः, कियान् गम्भीरः, कियान् मधुरश्चाय-

---

* शुक्लयजुर्वेद-वाजसनेयिसंहिता, ३६. १८।

मर्थः। आयुष्मन्तः, मध्यगगनमारूढः सूर्यः, तत् कथयामि, इहैवाद्य विरम्यतामस्माभिरिति।

---

## षोड़शः प्रपाठकः

—:o:—

### विविधम्

### ( ग )

### MISCELLANY

#### धातवः

गम् *bhu. p.* with अनु to follow.

प्रच्छ् *tud. p.* with आ *a.* to bid adieu.

मद् *div p.* with प्र to swerve from.

दृ *div. p.* to burst asunder.

शास् *ad. p.* with अनु to admonish.

अतिथिदेव *adj.* one who regards a guest as a god.

अनवद्य *adj.* blameless.

आचार्यदेव *adj.* one who regards his आचार्य as a god.

उपास्य *adj.* that which ought to be regarded.

गोष्ठी *f.* an assembly, generally of friends.

प्रसङ्ग *m.* a topic of discourse.

मातृदेव *adj.* one who regards his mother as a god.

क्षन्तव्य *adj.* one who ought to be pardoned.

दुर्विनय *m.* misconduct.

पितृदेव *adj.* one who regards his father as a god.

भूति *f.* prosperity.

विधुर *adj.* troubled, afflicted.

विप्रिय *adj.* disagreeable ; *n.* offence.

समावर्तन *n.* a ceremony which being performed after his finishing the course of studies in the Acharya's house a Brahmacharin returns home.

सुचरित *n.* good conduct.

आचार्य: । वत्स इन्द्रविजय, अपीह समागता: सर्वे ब्रह्मचारिण: ?

इन्द्रविजय: । भगवन्, एवमिदम् ; समागता वयं सर्व एव ।

आचार्य: । तदलं कालातिपातेन । सोम्य विजयसेन, अधीतं त्वया यदध्येतव्यमत्र, पालितं च सम्यग् अस्खलितं ब्रह्मचर्यम् । तद् वत्स समागतोऽद्य ते समावर्तन काल: । गार्हस्थ्याश्रमप्रवेशाय त्वयाद्य आचार्यकुलं विहाय गृहं प्रति गन्तव्यम् । वत्स, अतिदुर्भरो भारो गार्हस्थ्याश्रमस्य । अत: किञ्चित् पुनरनुशासितुमिच्छामि ।

विजयसेन: । अनुशास्तु मामाचार्य: ।

आचार्य: । वत्स त्वमितो गृहं प्राप्य—

"सत्यं वद ।

धर्मं चर ।

स्वाध्यायान् मा प्रमद: ।

सत्यान्न प्रमदितव्यम् ।

धर्मान्न प्रमदितव्यम् ।

भूत्यै न प्रमदितव्यम् ।

मातृदेवो भव ।

पितृदेवो भव ।

आचार्यदेवो भव ।

अतिथिदेवो भव ।

यान्यनवद्यानि कर्माणि तानि सेवितव्यानि, नो इतराणि ।

यान्यस्माकं सुचरितानि तानि त्वयोपास्यानि, नो इतराणि ।

श्रद्धया देयम् ।

अश्रद्धयाऽदेयम् ।

एष आदेशः ।

एष उपदेशः ।

एतदनुशासनम् ।" *

विजयसेनः । यथादिशति, यथोपदिशति, यथा चानुशास्त्याचार्यः ।

आचार्यः । सर्वथा स्वस्ति ते भवतु । वत्स विजयसेन, अलं विषादेन । नन्विदानीं गुरुतरं कृत्यमापतितं ते गृहे ।

* तैत्तिरीयोपनिषत्, १. ११ ।

तद्गच्छ तत्र प्रीतेन मनसा । गत्वा च दीर्घवियोगविधुरयोः पित्रोर्महान्तं नयनोत्सवमुत्पादय ।

विजयसेनः । भगवन्, कथमहमत्र एतावन्तं कालमेवं सुखेन यापयित्वा इतो दूरतरमिदानीं गमिष्यामि ।

आचार्यपत्नी । तात विजयसेन, किं करिष्यसि, ननु धर्म एवायं लोकस्य । अन्यच्च वत्स, अवश्यं द्रष्टव्यौ त्वयेदानीं मातापितरौ, पालनीयं च व्रतं गृहस्थस्य । तद् ब्रवीमि न त्वयैवं व्याकुलेन भवितव्यम् । गच्छ गृहं, वर्द्धय चानन्दं जनन्या जनकस्य च ।

विजयसेनः । भगवन्, अम्ब, वन्देऽहं वां चरणकमलानि । भगिनि इन्दुमति, भ्रातः कुश, स्मरणीयोऽस्मि कथाप्रसङ्गे । दीर्यतीव मे हृदयं युष्माकं वियोगशङ्कया । भ्रातरो ब्रह्मचारिणः, नूनम् इयन्तं कालं स्थितेन मया कृतं स्यात् किञ्चिद् विप्रियम्, तदिदानीं मृष्यतां भवद्भिः कृपयेति प्रार्थये ।

सत्यकामः । आर्य विजयसेन, नन्वहमेव ते बहुशो विप्रियमाचरम् । तदधुना क्षन्तव्योऽस्मि ।

विजयसेनः । भ्रातः, न त्वया किञ्चित् कृतम् । अतो न तत्र किमपि चिन्तयितव्यम् ।

ब्रह्मचारिणः । सखे विजयसेन, यदि किमपि विप्रियं स्यात् तर्हि वयमेव तस्य कर्तारः । न खलु विजय-

सेनः कस्यापि विप्रियं जानाति। तत् क्षम्यतामस्माकं दुर्विनयः।

विजयसेनः। भ्रातरः, नन्वलम् अलम् इदानीं तत्-कथया। न खलु युष्माभिस्तथा किञ्चिदाचरितम्। एष कथयामि ननु स्मर्तव्योऽयं बन्धुजनः गोष्ठीकथाप्रसङ्गे। अन्यच्च भ्रातरः, द्रष्टव्यौ युष्माभिस्तपस्वी नन्दकौ, हारीतश्च। तदिदानीम् आपृच्छे वः सर्वान्, अनुज्ञायतां मे समा-वर्त्तनम्।

सर्वे। सर्वथा शुभं ते भवतु।

आचार्यः। वत्स, अतिक्रामति गमनवेला, तत् किञ्चित् त्वरितुमर्हसि।

विजयसेनः। भगवन्, एवं भवतु।

आचार्यः। शिवास्ते पन्थानः। एते वयमपि त्वां नदीं वेत्रवतीं यावदनुगच्छामः।

# परिशिष्टम्

—:o:—

## श्लोकाः

### आह्लादाय

*For Recitation*

### प्रभातम्

उदयति मिहिरो विदलिततिमिरो
भुवनं कथमभिरामम् ।
प्रचरति चतुरो मधुकरनिकरो
गुञ्जति कथमविरामम् ॥ १ ॥

विकसति कमलं विलसति सलिलं
पवनो वहति सलीलम् ।
दिशि दिशि धावति कूजति नृत्यति
खगकुलमतिशयलोलम् ॥ २ ॥

शिरसि तरूणां रविकिरणानां
खेलति रुचिरतराभा ।
उपरि दलानां हिमकणिकानां
काऽपि हृदयहरशोभा ॥ ३ ॥

प्रसरति गगने नरपतिभवने
दुन्दुभिदमदमनादः ।
भज परमेशं पठ सन्निवेशं
भवतादनुपममोदः ॥ ४ ॥

## उद्बोधनम्

पूर्वगगन- मुद्यदरुण-

नूतनकररञ्जितम् ।

जीर्णतिमिर- जालरुचिर-

मम्बुदलववर्जितम् ॥ १ ॥

त्यजत कमल- कोमलतल-

तल्पशयनसेवनम् ।

जाग्रत ननु जाग्रत लय-

मेतु नयनमुद्रणम् ॥ २ ॥

शृणुत मुरज- मन्द्रनिनद-

मम्बरपथमुत्थितम् ।

पश्यत पुर उद्यमबल-

वैभवगुणमद्भुतम् ॥ ३ ॥

व्रजत, वहत कृत्यनिबद्ध-

भारमुपरि निर्भरम् ।

गच्छत, निज- कर्मसरणि-

माश्रयत च सत्वरम् ॥ ४ ॥

गायत शशि- शेखरजय-

मङ्गलमयगीतिकाम् ।

भ्रातर इह मधुसुमधुर-

मम्बरतलपूरिकाम् ॥ ५ ॥

लसतु विमल- शान्तिसलिल-
शान्तसकलविप्लवम् ।
भुवनविदित- भारतसुत-
वृन्दममितवैभवम् ॥ ६ ॥

---

## भारती

भारति धारय धारय वादय
वादय मधुरसमधुरां वीणाम् । ध्रुवपदम्
श्रवणं तोषय हृदयं मोहय
तर्पय भारतभुवमतिदीनाम् ।
जनय जनानां सरसनवीनां
मतिमिह कामपि कुशलनिदानाम् ॥ १ ॥
अतिशयविमलं तव पदकमलं
भगवति, विलसतु मनसि निकामम् ।
जननि, सकरुणं ननु तव नयनं
तिरयतु मानसमलमविरामम् ॥ २ ॥
गायतु भुवनं तव सुहिमानं
सुहितमुनिन्दितममितमुदारम् ।
अशरणशरणं भजतु च चरणं
यातु च निर्मलमोदमपारम् ॥ ३ ॥

---

## प्रदोषः

प्रकाश्य प्रस्फुटं क्षणं
प्रपीड्यञ्जगज्जनम् ।
सुदूरमस्तपर्वतं
रविः प्रयाति साम्प्रतम् ॥ १ ॥

न तस्य सा [illegible] ।
न तादृशी प्रचण्डता
न शक्तिरस्ति वा तथा
समस्तमेव हा हृया ॥ २ ॥

शनैः शनैः प्रसर्पति
रिपुस्तमो जगत् प्रति ।
कियच्चिरं नु सम्प्रति
स्थितो भवेद् दिवापतिः ॥ ३ ॥

---

## निदाघः

भास्करकर- कातरतर-
चातका द्रुत रोदिति ।
धावति द्रुत दावपतित-
भीतकलभसन्ततिः ॥ १ ॥

रौति करुण- मार्तहरिण
एष लुलितलोचनम् ।

वारिदवर,		वारि वितर

जीवतु जनजीवनम् ॥ २ ॥

---

## प्रावृट्

वियदिदमविरतमम्बुदमाला-
पूरितमभिसञ्चरति च चपला ।
निपतति नियतमियं जलधारा
मसृणसमुज्ज्वलरजताकारा ॥ १ ॥
अभिनवघनरसपानविलोल
श्चातकचय इह चरति सलील: ।
नवजलदागमविगतविषादं
नदति सुखं शिखिमिथुनमपीदम् ॥ २ ॥
दर्दुरगण इह कर्णकठोरं
नर्दति याति च मोदमपारम् ।
विमलसलिलकृतकौतुककेलि:
स्फुरति सरसि मधुरं मीनालि: ॥ ३ ॥
विकसितसुरुचिरसरसकदम्ब:
सौरभतोषितजननिकुरम्ब: ।
शैत्यसुसेवितसकलशरीर:
प्रवहति सदय इवेह समीर: ॥ ४ ॥

ध्वनितगगनतलगिरिवरविवरो
गर्जति गुरुतरमम्बुदनिकरः ।
सचकितमतिभयकृतचीत्कारं ।
चञ्चलमपि शिशुकुलमिह धीरम् ॥ ५ ॥

---

## भरतगीतिका

अलं भारतीया, मतानां विभेदै-
रलं देशभेदेन वैरेण चालम् ।
अयं शाश्वतो धर्म एको धरायां
न सम्भाव्यते धर्मतत्त्वेषु भेदः ॥ १ ॥
दया भूतसङ्घे, मतिर्देवदेवे,
चतुर्वर्गचिन्ता, विरोधाद् विरामः ।
मनःकायवाक्शोधने चैव बुद्धिः
परं धर्मतत्त्वं विरोधोऽत्र केषाम् ॥ २ ॥
नराः सर्व एकैकमीशं भजन्ते
स ईशः परं नामभेदेन भिन्नः ।
समुद्भासितो धर्म एतेन चैको
विचिन्त्येति को वर्ततां भेदवादे ॥ ३ ॥
कलिङ्गाङ्गवङ्गान्ध्रकद्राविडादी-
नुपाधीन् विहायैक्यमालम्ब्य भूयः ।

अये भारतीयाः पुरैवात्मरूपं
लभध्वं, यशश्चन्द्रशुभ्रं तनुध्वम् ॥ ४ ॥

पाण्डेयश्रीरामावतारस्य ।

---

चातकः

वातैर्विधूनय, विभीषय भीमनादैः,
सञ्चूर्णय त्वमथवा करकाभिघातैः ।
त्वद्वारिबिन्दुपरिपालितजीवितस्य
नान्या गतिर्भवति वारिद, चातकस्य ॥ १ ॥

गर्जसि मेघ, न यच्छसि तोयं,
चातकपक्षी व्याकुलितोऽयं ।
दैवादिह यदि दक्षिणवातः,
क्व त्वं क्वाहं क्व च जलपातः ॥ २ ॥

नदीभ्योऽपि सरोभ्योऽपि पिबन्त्यन्ये वयः पयः ।
चातकस्य तु जीमूत, भवानेवावलम्बनम् ॥ ३ ॥

नभसि निरवलम्बे सीदता दीर्घकालं
त्वदभिमुखनिविष्टोत्तानचञ्चूपुटेन ।
जलधर, जलधारा दूरतस्तावदास्तां
ध्वनिरपि मधुरस्ते न श्रुतश्चातकेन ॥ ४ ॥

कस्यापि ।

---

**भ्रमरः**

रात्रिर्गमिष्यति, भविष्यति सुप्रभातम्,
भास्वानुदेष्यति, हसिष्यति पद्मजालम्।
इत्येव चिन्तयति कोषगते द्विरेफे
हा हन्त हन्त नलिनीं गज उज्जहार ॥ १ ॥

कस्यापि।

---

धर्मं चरत माऽधर्मं, सत्यं वदत नानृतम्।
दीर्घं पश्यत मा ह्रस्वं, परं पश्यत माऽपरम् ॥

वसिष्ठस्य।

श्रूयतां धर्मसर्वस्वं श्रुत्वा च हृदि धार्यताम्।
आत्मनः प्रतिकूलानि न परेषां समाचरेत् ॥

व्यासस्य।

---

सर्वे भवन्तु सुखिनः, सर्वे सन्तु निरामयाः।
सर्वे भद्राणि पश्यन्तु, मा कश्चिद् दुःखभाग् भवेत् ॥

कस्यापि।

---

# OPINIONS.

Pandita T. GANAPATI SHASTRI, *Late Principal, Govt. Sanskrit College, Curator, The Department for the Publication of Sanskrit MSS., Trivandram :*

भवत्प्रणीतं "संस्कृतसन्दर्भम्" आमूलाग्रम् अवाचयम्। तत्र पदानि तावदति-ललितानि यथास्थानमसकृदुपयुक्तानि च सन्नह्यन्तीव स्वयमारोढुं बालानां चित्तम्। सरससंवादभङ्गिविशेषयोगात् लीलाप्रायविषयसौभाग्याच्च चेतोहरा उपलालनमिव बालानामारभमाणा अर्थोपन्यासाः स्वात्मनि सर्वज्ञे गुरावीश्वरे लोकव्यवहारेषु च केषुचित् सतीं धियं चर्यां चानायासं ग्राहयितुं शक्नुवन्ति, संभाषणवासनां च तेषामुत्पादयितुम्। सोऽयमभिनवप्रस्थानो वः संस्कृतसन्दर्भो 'बाललालनशिक्षा' इति, मन्ये, व्यपदेशमर्हति। इदं चाभिप्रैमि यदेवञ्जातीयैः क्रमगुरुभिः पञ्चावरैः संस्कृतसन्दर्भैः शिक्षाभिर्ग्रन्थैः काचिदवश्यं रचयितव्या ययैकया हिन्दुबालाः संस्कृतभाषा-सत्पथोभयव्युत्पत्तिभूमिकासङ्क्रममासादयेयुः।

Pandita APPA SHASTRI RASHIVADEKARA, VIDYAVACHASPATI, MAHOPADESHAKA, *Editor,' Sanskritachandrikā" and "Sunritavālini," Poona ;*

* * * अपनीत इव क्षणं मानसो मे तापो नयनसरणिमापतितेन विस्तारित-विषयान्तरेण सर्वतोऽपि बलादिव समाकर्षता हृदयं भवदीयेन "संस्कृतसन्दर्भेण।" अहो रामणीयकमस्य। यत्सत्यं प्रतिक्षणनवं समास्वादयदस्य सौरस्यं नाप्नोति सौहित्योन्मुखत्वमेतदन्तःकरणम्, भूयोभूयस्तु स्पृहयत्येतस्यास्वादाय। लघून्यपि प्रसन्नानि प्रस्यन्दमानानीव मधुरिमाणं नर्तयन्तीव मे चेतः संस्कृतसन्दर्भवाक्यानि। अत्र चोक्ति-प्रत्युक्तिभङ्ग्या समुपनिबद्धा सुग्रहा चावश्यमुपकरिष्यति बालानां नीतिः। एतं च प्रबन्धमारचितवता दूरमुत्सारितमिदानीं प्रियबन्धुना कियताप्यंशेन संस्कृतपाठपुस्तक-दारिद्र्यं बालानाम्। नह्येतादृशमपरं मनोरमं प्रबन्धं पश्याम इति।

Pandita R. V. KRISHNAMACHARIAR, ABHINAVA-BHATTA-BANA, Shabdatarkālamkāravidyābhushana, *Tirruvadi, Tanjore :—*

अनभ्रा सुधावृष्टिरिव श्रीमतां मूर्तिमान् प्रसादः शब्दार्थसुकुमारः "संस्कृतसन्दर्भो" लब्धो मया। बालानामादितो व्युत्पत्तिमाधातुं प्रश्नोत्तरिकया सदाचारं हृदयाल-

गयितुं चैतत्सम:, किमुत एतदधिक: ग्रन्थो न केवलं नास्ति, परं तु नोत्प्रत्स्यते चेत्येव मे द्रढीयान् विश्वास: ।

PANDITA VANAMALI CHAKRAVARTY, VEDANTATIRTHA, M A. *Professor, Cotton College, Gauhati, in the Modern Review, November, 1912 :—*

It is a First Sanskrit Reader especially written and compiled for young boys. The author is a well known Sanskrit and Pali Scholar, and this little book shows that he has devoted a good deal of time and attention to the subject of Sanskrit teaching. *The Reader is excellent from all points of view, and may be safely placed in the hands of the beginners of Sanskrit.*

Pandita NILKAMAL BHATTACHARYA, M. A. *Professor of Sanskrit, Central Hindu College.*

*Sanskrit-Sandarbha* by PANDIT VIDHUSHEKHARA SASTRI, is a *nicely written* reading book for young learners of Sanskrit. The lessons are *suitably arranged* and the book furnishes a *graphic picture* of ancient pupilage, which will impress the young mind *most salubriously. This is, in fact, the kind of books we need for our boys at the present day.*

---

Mr. M. P. OKA. *Sanskrit Tutor. N. E. School, Poona City.*

संस्कृतसन्दर्भ is an *excellent* little book *admirably* adapted to the requirements of those for whom it is intended. As regards the *style* in which it is written and the *matter* it contains, I may only say that *nothing is left to be desired.* I have great pleasure in recommending it to my pupils and will be very glad to see it sanctioned by the Educational Department for use in secondary schools in this Presidency.